ORISSAN ORIENTAL TEXT SERIES (SANSKRIT)—7

MADHURĀNIRUDDHANĀṬAKAṂ

By

CHAYANI CHANDRAS'EKHARA RAYAGURU

Edited By
SRI BHAGABAN PANDA, M. A., Sahityacharya
EDITOR

Directorate of Cultural Affairs
ORISSA, BHUBANESWAR

Published by :

DIRECTORATE OF CULTURAL AFFAIRS
ORISSA, BHUBANESWAR-751006

First Edition : **1000**
1977

Printed at :

SHAILA PRINTINGS
CUTTACK-1

Price :

उत्कलीय प्राच्य-ग्रन्थमाला (संस्कृतम्)—७

चयनिचन्द्रशेखररायगुरुविरचितम्

मधुरानिरुद्धनाटकम्

ओड़िशाराज्य-सांस्कृतिकव्यापार-विभाग-निर्देशालयसम्पादकेन
संस्कृतोत्कलभाषयोः स्नातकोत्तरोपाधिकेन साहित्याचार्येण
श्रीमता भगवान् पण्डाशर्म्मणा
सम्पादितम्

प्रथम मुद्रणम्—१०००

१९७७

कटकस्थिते शैलप्रिण्टस मुद्रणालये मुद्रितम्

Introduction

The contribution of Orissa, to the various branches of Sanskrit literature is no doubt very significant. To bring them to light the Directorate of Tourism and Cultural Affairs, Orissa, has taken necessary steps to edit and publish some of the important Sanskrit and Oriya works composed by the scholars of Orissa. The present volume 'Madhurāniruddha Nātakaṃ' will substantiate the Sanskrit dramatic literature composed in India.

Description of manuscripts :—

The present edition of the Madhurāniruddha Nātakaṃ by Chayani Chandraśekhar Rāyaguru a reputed Sanskrit scholar of the first half of the 18th century A.D. is based on the following five manuscripts out of which first four are in collections of the Manuscript Library of the Orissa State Museum and the fifth one is in the Manuscript Section of the Utkal University Library. They have been footnoted as Ka. Kha, Ga, Gha and Ṅ in the text.

(1) Ka. Cat. NO. L. 176

It is a palm-leaf manuscript containing 68 folia measuring 35.5 × 3.4 C. M and is in a fare state of preservation. There are three lines of writing in Oriya characters on each side of the each folio. The text is complete. This manuscript was collected from Gaḍamadhupur in the district of Cuttack in 1960

(2) Kha. Cat. No. L. 35 (a)

This is a palm leaf manuscript containing 83 folia measuring 30×2.5 C M There are four lines of writing in Oriya characters on each side of each folio. The text of the Nātaka is complete at 67 folia and the rest folia contain the Nṛsingha Śatakaṃ by Kavi Gaṅgādhar of Kautsasa gotra. The manuscript was colllected from Sakhigopal in the Puri District by the then Provincial Museum, Cuttack in 1950.

(3) · Ga. Cat No. S. Mss.-4

It is a paper manuscript of 48 pages measuring 34 × 21 C.M. There are 18—23 lines of writing in Oriya characters. The text is incomplete and ends just before the verse No. 18 of the 5th act. It was acquired by the Provincial Museum in 1950.

(4) Gha. Cat No. L 94 (a)

It is a palmleaf Manuscript and contains 142 folia measuring 4 × 3.5 C. M. There are four lines of writing in Oriya characters on each side of each folio. The text of the Nāṭaka is complete at 49 folia and rest of the folia contain Vāsavadattā of Subandhu upto 87 folio and Champūrāmāyaṇaṃ of the Lakṣmana Sūri till the end. The manuscript is wormeaten and many letters and words are lost.

(5) Ṅ. Cat. No. L-169

This is a palmleaf manuscript containing 83 folia measuring 21 × 3 C. M. and there are 3—5 lines of writing in Oriya scripts on each side of each folio. The text of the Nāṭaka is complete The manuscript is damaged seriously and it is difficult to utilise the whole text.

Out of the above manuscripts the first and last two (Ka. Gha. and Ṅ) have Prākṛta dialogues with their Sanskrit renderings. All the manuscripts do not contain any colophon or the date of copy and name of the scribes. The scribes also did not strictly follow the rules of engraving Ṣa, Śa and Sa and ṇa and na which were corrected at the time of editing but the differences of the words, sentences, additions and omissions that were found in the manuscripts, have been footnoted.

The author : Chandraśekhar—

The poet Chayani Chandraśekhara Rāyaguru of Madhurāniruddha Nāṭaka has introduced himself through the Sūtradhāra.[1] He was the second

1 M. N. (Madhurāniruddha Nāṭaka)—Act – 1—verse—6

son of Rājaguru Gopīnātha Vājapeyi of the vatsa family: Gopinātha, a famous smrti—writer, had performed seven Soma and one Vājapeya sacrifice during his lifespan. His elder son Visvanāth Pattajoṣi was a famous scholar in logic like his younger brother Chandraśekhar who in addition has pronounced erudition in the composition of works on Dhvani, Chhanda, Kāvya and prabandhas[2]

Tradition about Chandraśekhar

Chandraśekhar Rāyaguru is nick-named as Chāndu Rāyaguru in the story still recurrent in Puri area. The story goes—When Vīrakeśari Deva went mad and mismanaged the affairs of the state, Chāndu wanted to place the son of his patron on the throne of Khurdha, against the will of the king. So to materialise this he, along with his brother sought the help of Raghuji Bhonsle of Nagpur the overlord of Vīrakeśari Deva. But Raghuji was then under the custody of Peshwa of Poona The two brothers went to meet the Peshwa. As is a customary in Poona, an interviewee was to beat a drum hanging at the gate of the palace. The number of beatings would indicate the number of 'Vidyās' one had mastered. To the surprise of all Chāndu Rāyaguru beat on the drum eighten times as he was 'Astādaśavidyā Pravīṇa.' The beatings were over. He was readily granted an interview with the Peshwa. There he had a long discourse with the Pandits of his Durbar on the eighteen branches of learning while the debate on the 'Nyāya' system of philosophy was going on, he took the help of his brother Viśvanātha The Peshwa was immensely pleased with him, and wanted Chāndu to ask for anything he desired. But the Rāyaguru simply prayed for the release of Raghuji. The two brothers overjoyed with success, returned to Nagpur with Raghuji and with his help tried unsuccessfully to dethrone Vīrakeśarī eva (I). The historicity of this tradition could not be examined for paucity of records of the Marhatta Period at our disposal. Chāndu Rāyaguru is also credited with the authorship of a good commentary on the 'Naiṣadha Mahākāvyam' the manuscript of which is not yet discovered.[3]

---

2. M. N.—Act—1—verse—7
3. A descriptive Cat of Skt. Mss - Vol—II—P—LXV.

But it is known from the first translated book of 'Naiṣadhacharita' by K. K. Handiqui, the Vice-Chancellor of Gauhati University, that the manuscripts of Commentary on Naiṣadhacharita by Chāndupandita are kept presesved in the Bhandarkar Institute in which the commentator gives the date of his work as Samvat 1353 or 1297—A.D. at the end of 22 canto of the Naiṣadhacharita by Sriharsa. The translator further comments that "the commentary was completed when Sāṅga was the king and Mādhava the prime-minister. This Sāṅga is obviously the same as Sāraṅgadeva, the Vāghelā king of Gujarat who ascended the throne in 1277 A.D. and reigned for twenty years that is till 1297 A.D, the year in which Chāndupandita's commentary was written. Chāndupandita's father was Āligapandita and Gauridevi was his mother. Vidyānātha was his teacher but he studied the Naiṣadha under Manideva and the Mahābhārata under Narasingha Pandita. The commentary itself furnishes adequate evidence of the range of his studies and his wide acquaintance with the various branches of learning"[4] So that Chāndupandita of Gujrat and Chāndu Rāyguru of Orissa are seemed to be different persons though they were known in one name and their commentary on one work as will be known from the following passages. This conclusion can be more authenticated when the commentary on Naiṣadha Mahākāvyaṃ of Chāndu Rāyaguru will be made avilable.

The family of Chandraśekhar

The ancestors of Chandraśekhara were renowned scholars in different branches of Sanskrit literature and were administrators too. They had occupied the post of Prime-minister and royal preceptor of the king from the establishment of Bhoja dynasty to the reign of Solar dynasty. This has been depicted in Bhaktibhāgavata Mahākāvya[5] of Kavidindim Jivadevacharya (1475 A.D). The ancestors of Chandraśekhar continued to hold the celebrated posts in the administration till the reign of Gajapati Divyasingha Deva-I of the Bhoi dynasty. Gopīnātha Vājapeyee. the father of Chandraśekhara was the Rājaguru of Divyasingha Deva I (1688 – 1714 A.D). Gopīnātha was the son of Balabhadra and grandson of Vardhan Mahāpatra.[6]

4. Naisadhacharita of Sriharsa – by K. K. Handiqui-II-Edn.-1956-P-18-19.
5. Bhaktibhāgavata Mahākāvyam—cant—32.
6. Utkala Itihāsara eka ajñata adhyāya - P—171.

Thus the genealogy of the family of Chayani Chandraśekhar may be drawn as follow--

Vāsudeva Mahāpātra Rājaguru
|
Trilochan Deva
|
Kavidindima Jivadevāchārya
|
- Jayadeva II
- Vardhan Mahāpātra
  |
  Balabhadra Mahāpātra
  |
  - Dharma Deva
  - Gopinātha
    |
    - Viśvanātha
    - Chandraśekhar
  - Bhānu Deva

From the above discussions it can be stated with more certainty that Chandraśekhara was the contemporary of Gajapati Rāmachandra Deva II (1727 - 1736 A.D.) and his son Virakeśari Deva I (1737—1793 A D.)

Name of the Drama—

The manuscripts (Ka—Gha) in the collections of the manuscript library of the Orissa State Museum are named as Madhurāniruddhanātakam whereas Manuscript (Ṅa) of the Utkal University library is titled as 'Uṣāniruddhanātakam' [7] The title 'Madhurāniruddhanātakam' is more acceptable, for, it has supporting references by the earlier scholars in their works.[8]

Date of Composition—

It is stated in the work that Chandraśekhara has composed this drama during the reigns of Gajapati Rāmachandra Deva and his son Virakeśari Deva[9]. It is more probable that after Virakeśari Deva's coronation the work was completed. Hence the time of the work can be fixed at some period between 1730-1739—A. D.

7—M. N.- Text Page—2
8—(a) Prachina Utkal by Jagabandhu Singh - page – 44
(b) A History of Orissa—Vol I. Ed. N. K. Sahu—page—213
(c) A Descriptive Cat. of Sanskrit Mss Vol. II pages 91—93
9—M. N. Canto—1—Verse—4

Source of the Drama—

This work 'Madhurāniruddhanātakam' is based on the love and marriage between Uṣā the daughter of Bāṇāsura and Aniruddha, the grandson of Śrikṛṣṇa. This story with little variations in the name of 'Uṣāharaṇa' and 'Uṣapariṇaya' has been described in different Purāṇas both in Sanskrit[10] and in regional languages of India. In Orissa, the 'Uṣābhilāṣa' an Oriya kāvya in 12 chhāndas (cantos) of Śiśusaṅkar Dāsa (1555—A. D.) is based on the story of 'Uṣāharaṇa' as described in the Oriya 'Mahābhārata'[11] of Śūdramuni Sārala Das (1435—1500 A. D.) and in Oriya Bhāgabata[12] of Ativadi Jagannātha Dāsa (1497—1535 A. D) written in the style of 'Harivaṃśa' and Śrimadbhāgavatam respectively prior to the poet Śiśusaṅkara. But the poetic style and presentation of facts by Śiśusaṅkara make his Kāvya 'Uṣābhilāṣa' distinguished from those earlier works The story Uṣābhilāṣa is briefly stated below—

Bāṇāsura, the son of Bali, ruling in Śoṇitapura, was a great Śaiva. Once he prayed for a fight with Śiva. Śiva in turn cursed him with a bad omen that when the flag would drop down from his car he would face a fierce fight. (I) His only young beautiful daughter Uṣā (II) saw Devi Umā dallying with Śiva and expressed her desire for marriage. Uṣā fancied to marry the man whom she would dream on the 13th moon of Vaiśākha. (III). On the appointed day at an auspicious moment Uṣā dreamt of a handsome youth and fell in love. The dream was over. She plunged into grief at the separation (IV). Her intimate friend Chitralekhā consoled Uṣā and (V) prepared the potraits of all the princes of the three worlds to identify the lover. Uṣā identified Aniruddha who was brought from Dvārakā by the magic power of Chitralekhā learnt from the sage Nārada. (VI) Both the lover and beloved united

---

10—(a) Śrimadbhāgavatam Book – 10 Ch—62—63

(b) Viṣṇupurāṇam Part V Ch—32—33

(c).Brahmavaivarta—(Śrikṛṣṇajanmakhaṇdam) Ch—114—116.

(d) 'Harivaṃśam Ch—106—118

11 Sāralā Mahābhārata (Oriya) Madhyaparva Part—II p—642—650

12—Śrimadbhāgavata by Jagannatha Dasa (Oriya) Book 10—Ch—67-68

secretly at Pānāpurī (VII). When they were enjoying their time in pleasant pastimes (VIII) playing dice (IX) the flag dropped down from the car of Bāṇāsura. At the sametime a guard from heaven reported the clandestine love episode of Uṣā and Aniruddha (X) to Bāṇa who immediatly imprisoned Aniruddha and the news was conveyed to Śrikṛṣṇa and Balarāma in Dvārakā by Nārada (XI) Śrikṛṣṇa and Balarāma marched at the head of a huge army to Śoṇitapura and defeated Bāṇa and returned to Dvārakā with Uṣā and Aniruddha to the great rejoicing of the people who accorded them an enthusiastic reception (XII).

This subject matter of 'Uṣābhilāṣa' has most probably influenced the dramatist Chandraśekhara and his 'Madhurāniruddhanātakaṃ' has successfully represented the story elements in dramatic way with considerable originality.

The Plot—

Act I

(Upāyopanyāsa)

After recitation of the invocatory verses addressed to Śiva and Śakti, the Sūtradhāra introduces to the audience the Śiva - yātrā locally called 'Śiva Vivāha' or Śitalaṣaṣthi-yātrā. It is according to him, the proper occasion to stage the Madhurāniruddhanātakaṃ

He asks his partner Natī to sing on the prevailing spring season. After Nati's song, the Sūtradhāra in describing the season gives the essence of drama in a nutshell, "Nothing is impossible on the part of Almighty". The drama hovers round this central idea. From behind the screen the sage Nārada explaining the same line declares that nothing is difficult on the part of Mādhava who is the younger brother of Balabhadra and the architest of the whole universe.

The sage Nārada meets Baladeva and Mādhava engaged in some confidential discussion and being asked, he narrates Mahendra's dejected state of mind caused by the activities of Bāṇa. the powerful king of Śoṇitapura. Bāṇa through his devotion becomes affectionate of Śiva and Pārvatī. The divinities like Kuvera, Yama, Varuna, Agni, Dikpāla including Brahmā and the sage Marichi etc. wait upon Bāṇa. Bāṇa also forcibly causes Indra (Bṛddhaśravā) to descent into the caves of Sumeru hills.

Balabhadra and Śrikṛṣṇa after discussion with Nārada bade him to proceed to Ś ṇitapura to assess the military strength of Bāṇa It is further decided that Garuḍa and Pradyumna should also be informed of the fact.

Act II

(Vasantaṛtupravartanaṃ)

In the prelude the Kañchukī indicates that the princess Uṣā has been blessed by ārvati during her(Pārvati's) frolicking in water. Kañchukī further wants to know more about the incident. Just then a soliloquy advises him to contact Jayā a close companion of Uṣā now inside the garden.

After this prelude, Jayā appears talking with Virabhadra who informs that Śiva and Pārvati will go back soon to Kailāsapuri Jayā comments that so long as Bāṇa is there Śiva cannot leave Śoṇitapura. "The end of Bāṇa is very near" says Virabhadra. He further explains that Bāṇa, after conquering all, is now not happy in fighting with heroes of equal status. His arms are now yearning for struggle with more powerful heroes. This he expresses before Śiva who replies that his ambition will be fulfilled soon when his peacock-emblemed flag will drop down After the departure of Bāṇa in grief from his presence, Śiva instructs to clean his abode Kailāsapuri where he will go back leaving his arrogant devotee Bāṇa.

Jayā then inquirs about the person who would kill Bāṇa. Virabhadra hints at the name of Uṣā. Jayā understands and tells that Uṣā has gone that day to see Pārvati. At that time Pārvati is with Śiva at water sports in fort pond. At this sight Uṣā loses her balance of mind. Pārvati consoles her and confers upon her a boon that she will have a handsome husband of whom she would dream on the 13th night of the lighted half of Vaiśākha. This in no way lessens the mental agony of Uṣā. It increases day by day. The words of Uṣā and Chitralekhā are heard from behind the screen. Jayā and Virabhadra hide themselves in the groove to hear them.

Uṣā appears talking with Chitralekhā and while plucking flowers she asks her mate to hold the punnāga tree which would fulfill her ambition. Chitralekhā in reply tells Uṣā that she should hold it and get her desire fullfilled according to the boon of Pārvati. Uṣā wonders if she will dream her future husband that night ?

"Certainly" says Chitralekhā, "The words of the Goddess never go invain". Uṣā inquires, "How far is that night ?" Chitralekhā says, "It is very near as the month of Madhu has already passed. Don't worry over this matter". Uṣā asks again, "Will that man of the dream be handsome and of high birth ?" Chitralekhā clears her doubts again by making a mention of the boon. After discussions they proceed to Goddess Pārvatī.

At the groove Jayā repeats her query, "Who is that man who would kill Bāṇa ?" Virabhadra having no intention of keeping any thing in secret from Jayā reveals the name of Aniruddha, the grandson of Śrikṛṣṇa, the king of Yadus. Jayā expresses her thanks on hearing the news and inquires how it could be possible. Virabhadra explains in general that the things like wealth, wisdom and wife come to men even as it is predestined. Then they leave to see Pārvatī.

Act III

(Nāyakavipralambha)

Aniruddha sets out with his friend Bakulāṅka. The Spring prevails with its heavenly beauty and grace all around. The trees are laden with maiden leaves. The breeze is sweet with the melodies of the bees and the whole atmosphere throws an invitation to Kandarpa,the Love God. Aniruddha becomes unmindful which is noticed by Bakulāṅka and he wonders if Aniruddha is thinking of Rochanā. When Aniruddha seems to prefer solitude his friend advises him to be frank in order to relieve his mind of anxiety. Aniruddha narrates the dream but fails to identify the beauty queen of the dream. He gets a trance and when it is over, they proceed to consult some sage present in the company of the grandfather of Aniruddha for finding the meaning of the dream. In meantime the arrival of sage Nārada in the scene is announced.

Nārada appears and blesses them. He sees Aniruddha pale and unmindful. Bakulāṅka narrates the incident to the sage and inquires of the lady about the dream. Nārada after meditating for sometime, informs that the lady is Uṣā and she is the only daughter of Bāṇa the king of Śoṇitapura. He leaves the place after blessing them again.

Aniruddha expresses his sense of misfortune in not being able to meet her. Bakulāṅka consoles him not to be discouraged and tells him that every-

thing can be solved through proper ways and means as very powerful things are made out of atomic energy and mercury. Aniruddha wonders if anything can be done when a heavy fire always encircles the whole of Śoṇitapura. "We can have supernatural powers to overcome it through the worship of Goddess Jvālāmukhī", explains Bakulāṅka. They then decide to try to achieve their purpose, and leave the place.

Act IV

(Dhvajabhaṅga)

Bāṇa appears with the minister Kumbhāṇda and asks him the means of calming down his arms which are restless even after achieving victory over the whole universe. The minister quotes politely a wise saying that pride on the part of a king is his irrepressible enemy.

Bāṇa denies this and asks his hesitant minister not to question the valour of his king. "But natural calamity that has set in over the kingdom plays havoc on the subjects who are now alarmed" says Kumbhāṇda. He also reminds the king of the words of Śiva. Bāṇa rebukes the minister for incoherence of his statement."It is a pity that a minister of your status advises Bāṇa, the proud possessor of a thousand brave arms, in this way. It is still more pitiable to compare your king with Arjuna and Daśānana". Bāṇa is angry with the poor minister but spares him because of his old age. But the next moment when Bāṇa wants to kill his minister by the sword a maid Kañchukī comes in and intervenes with the information about the natural calamities which have caused the flag to fall down. Bāṇa spares Kumbhāṇda and gives orders to the maid Kañchukī to engage Brāhmaṇas to calm down the disturbances. The Kañchukī tells again that the queen has to worship gods for this accident.

In the meantime Makarikā comes in and informs that queen Priyambadā is coming to meet the king after which Priyambadā appears and Kumbhāṇda and the Kañchukī leave the place. Bāṇa says, "Darling, what is the reason that led you to come so hurridly ?" "Has not the fearful news about the damage to the flag reached the King ?" replies Priyambadā. Bāṇa consoles her and asks why the queen is without her ornaments. Makarikā informs that it is due to observance of a vow. Then Bāṇa wants to know about that and Makarikā answers. "But.this is useless" says Bāṇa and embraces the queen

who in fear of breaking the vow sorrowfully prays him to seek the favour of God. Bāṇa cunningly agrees to the proposal and draws her attention to the approaching evening. The panegyrist announces the time of twilight and Bāṇa with Priyambadā leaves for the inner chamber.

Act V

(Khecharasiddhi)

In the prelude Bhṛṅgi lands from an aircraft and reveals that he has come with a message from Pārvatī who is at Bāṇanagara to Jvālāmukhī with a request not to delay in rewarding Aniruddha with the fruits of his penance. Aniruddha may soon get an entry to the impassable Śoṇitapuri to meet with Uṣā. Bhṛṅgi, on the way to Jvālāmukhī, comes across famous places like Nilāchala, Svarṇakuta, Viraja Kṣetra (in Orissa), Vallies of Gaṅgā (in Gauḍa), Gayā (in Magadha), Vāraṇasī, Prayāga, Ayodhyā, Vṛndāvana, Govardhana hills (in modern U.P) and Kurukṣetra (in Punjab).

After this prelude Aniruddha appears infatuated with passion on the pavilion before Jvālāmukhī at the time of evening. He stands meditating at the front gate of the temple. In the meantime a female devotee comes there and requests him repeatedly not to block the way so that she can enter into the temple. But it is all in vain. Aniruddha remains dumbfounded. The lady becomes furious at which Aniruddha asks about her identity. But she asks some questions in return and comes to know of the wish of Aniruddha. She also advises him to be audacious enough to sacrifice his life and leaves that place. When Aniruddha takes the sword to cut off his own head, Devī Jvālāmukhī appears in person before him and grants the boon according to his desire.

Act VI

(Nāyakāniruddha)

The Jyotiṣaka recites a benedictory verse and declares that the 13th day of bright fortnight of Vaiśākha has elapsed. Uṣā dreams according to the prophecy. Now she is deep in love. Then she proceeds towards the harem to know more of the fact.

After this Uṣā and Chitralekhā with an album of paintings appear on the stage. Uṣā tries to identify the youth seen in her dream in the album of the paintings of the youths of the three worlds painted by Chitralekhā.

In the meantime Nārada appears and duly gets reception. He asks about the cause of weakness of Uṣā. Chitralekhā tells Nārada in detail about the dream and after obtaining permission spreads the album which contains the pictures of the kings of Magadha, Mathurā, Avanti, Madra, Māhiṣmati, Vidarbha and Hastinā. As the leaves of the album are lifted one by one the turn of Dvārāvati comes and the portrait of Aniruddha is identified by her whom Uṣā saw in dream. Nārada advises utterance of a mantra by which Chitralekhā can go to Dvārāvati keeping Uṣā under his care.

Act VII

(Priyatamāsamāgama)

Aniruddha and Chitralekhā get down from the aircraft at the pleasure garden where Uṣā and Nārada are waiting. Nārada unites the hands of Uṣā and Aniruddha in marriage and tells them that Chakrapāṇi would be feeling the absence of his grandson. So a letter should be sent to him. He dictates to Chitralekhā a letter addressed to Chakrapaṇi narrating all the facts and requests him to come with Balabhadra and Pradyumna and then leaves the place for his evening prayer with a promise to transmit that letter through his friend Parvata.

Nārada leaves and all are engaged in friendly discourse. In the meantime the Kañchukī declares from behind that Queen Priyambadā, apprehending a bad omen at the flickering of her right arm and eyes, comes to see her daughter. Chitralekhā staying for a while in the company of Uṣā, retires with Uṣā leaving Aniruddha alone. Aniruddha feels deserted and pours out his feelings before the trees and creepers to get sympathy. In the meantime Uṣā and Chitralekhā return to Aniruddha and proceed to the Mālatilatāmaṇḍapa. The approach of the night is sounded, Chitralekhā then guides the couple to the bed room.

Act VIII

(Aniruddhānanda)

In a prologue the sage Nārada appears and indicates that inspite of all possible steps taken by Uṣā and Chitralekhā to conceal Aniruddha through supernatural power, he has been detected at last by the attendants of the harem. In this state of affairs Aniruddha prepares himself for fight with Bāṇa, who furiously comes forward to punish him. But neither Govinda with Baladeva and Pradyumna has reached the place nor Parvata who went to Dvārakā with the message has yet returned.

As Nārada remains gloomy impatiently thinking over the matter Parvata comes forward. They both meet and discuss about the capture of Aniruddha and look forward to the arrival of Govinda with the Yadus.

Nārada and Parvata hide themselves under a 'pippala' tree to observe the fighting between Bāṇa and Govinda each aided by his military forces. The fighting starts and in the meantime, Śiva comes in with his Pramathas for rescuing his devotee Bāṇāsura. At last they all get defeated by Chakrapāṇi. The fighting then concludes. They all gather beneath the pippala tree and Nārada and Parvata welcome them.

Devi Pārvatī comes there with Uṣā who pays respect to all present there. Pārvati joins the hands of Uṣā and Aniruddha before all present there, The drama ends with the good wishes of Pārvatī.

CRITICAL NOTE

(A) Sanskrit Dramatic Works of Orissa—

Orissa had a very rich heritage of Sanskrit dramatic literature well before the dramatist Chandraśekhara beginning from the middle of the 8th. century A D The pioneering poets and their works in this field are enlisted below for information.

1. Anargharāghavanātakaṃ by Murari Miśra (750-A. D.),

2. Prabodhachandrodayanātakaṃ by Mahāmahopādhyāya Kṛṣṇa Miśra (1050-A. D.)
3. Natakamelakanātikā by Kaviraja Saṃkhadhara, a contemporary of Govinda Deva, the Chief Minister of Anangabhima Deva II (1290-1298-A. D).
4 Puṣpamālānātikā by Chandraśekhara Sāndhivigrahika Mahāpātra, Minister of Bhanu Deva III (1353-1378-A. D.)
5. Uṣāpariṇayanātakaṃ by Raghavānanda Sāndhivigrahika Mahāpatra (1378-1395-A. D.)
6. Prabhāvati Pariṇayanātakaṃ and
7. Chandrakalā-ātikā by Kavirāja Visvanātha (1407-1434-A. D.) the famous writer of Sāhitya Darpaṇa.
8. Paraśurāmavijayavyāyoga by Gajapati Kapilendra Deva (1435-1466 A. D.)
9. AbhinavaVenisaṃhāranātakaṃ by Gajapati Purusottama Deva (1466-1497 A. D)
10. Bhaktivaibhavanātakaṃ and
11. Utasāhavatirūpakaṃ by Kavidindima Jīvadevāchārya (1450-1535 A. D.)
12. Dhūrtacharitabhāṇa, and
13. Pārijātaharaṇanātakaṃ by Kavichandra Divākar Miśra (1466-1535 A. D.)
14. Jagannāthavallabhanātakaṃ by Rāya Rāmānanda Pattanaik (1497-1535)
15. Piyuṣalaharirūpakaṃ by Jayadeva, son of Jivadevāchārya
16. Srikṛṣṇabhaktavātsalyanātakaṃ by Gajapati Rāmachandra Deva (1568-1600 A. D.)
17, Triśiravadhavyāyoga, and

18. Kaṃsavadha by Kavi Chintāmaṇi Miśra (1530-1580-A. D.)

19. Bhañjamahodayanātika by Narasingha Miśra (1648-1660 A. D.) and.

20. Maṇimālānātikā by Anādi Miśra (1668-1720 A. D.).

Most of these dramas are based on themes taken from Mahābhārata, Rāmayaṇa, Bhāgavata and other purāṇas mainly. But the dramas based on the episodes of Krisna and his associates are highest in number. Besides there are many other rūpakas of various types. Almost all of these are yet unpublished.

The story of love and marriage of Uṣā and Aniruddha is more widely popular than other Puranic stories, because besides Puraṇic works it has been widely described in the form of Kāvyas and Nātakas in both Sanskrit and regional languages throughout India. The names of the dramas written on the theme are noted below for reference. They are—

(1) Uṣāniruddhanātakaṃ by Kāshirāja.

(2) Uṣārāgodayanātikā by Rudra Deva (1268-1319 A. D.) the king of Warrangal.

(3) Uṣāpariṇayanātakaṃ by Krisna Deva Ray (1509-1529 A D.) of the Vijaya Nagar Kingdom and

(4) Uṣaharaṇanātakaṃ by Harsanātha[12].

It is clearly evident that the dramatist Chandraśekhara was influenced by the literary trend of his homeland and to cope up with the social and cultural mileau of his age, he ventured to write this Madhurāniruddhanātakaṃ for the purpose of the propagation of the Kṛṣṇa cult.

---

12. History of Classical Sanskrit Literature – M. Krishnamacharya p-693-697.

Technical Remarks –

The 'Madhurāniruddhanāṭakaṃ' is a drama in eight acts and displays almost all the characteristics of a Nāṭaka described by Kavirāja Visvanātha Mahāpātra of Orissa in his 'Sāhityadarpaṇa' a famous writer on rhetorics in Sanskrit.

The subject of a Nāṭaka should be historical. The hero should be a king, a royal sage or a god of the type known as Dhirodātta The hero may appear with godly power. The dominant sentiment must be heroic or erotic but all other sentiments may be illustrated. The number of acts should be from five to ten with four or five chief personages The name of the Nāṭaka should be derived from the hero and the heroine or the subject matter [13]. These characteristics are to be found in this drama and therefore it is rightly called a nāṭaka.

The incidents such as Śiva's curse on Bāṇa, Uṣā's dream, falling down of the flag, the imprisonment of Aniruddha, the role of Nārada throughout the drama are dramatically presented through the dialogues of Jayā and Virabhadra, Chitralekhā, Nārada and Parvata. The sequences of dream and love described dramatically through the dialogues of Chitralekhā Bakulāṅka, Makaikā, Nārada and Parvata, prove the originality and capability of the poet Chandraśekhara in telling the story in the form of a drama.

(C) **Characters—**

Aniruddha and Uṣā may be taken as the hero and the heroine of the drama. Aniruddha is a Dhirodātta type of Nāyaka or hero He is self-controlled, exalted and interested in arts. The heroine is a mugdhā-kanyā, Parakiyā, as the dramaturgists call the in-experienced and not independent type of young lady. The hero is bold, courageous and noble and the heroine is lovely, sweet and graceful.

The Pratināyaka or villain Bāṇa, the enemy of the hero is of the Dhiroddhata type. He is self-willed and reckless. He is also proud and vicious.

The sage Nārada goes by the by to meet love-stricken Uṣā and Aniruddha in their respective places and plays an important role in uniting them. He is at the head of almost every situation in the drama.

13 Sahityadarpana – Ch VI. Verses 7-11.

Chitralekhā, the daughter of Kumbhāṇḍa, the minister of Bāṇa, is a close companion of Uṣā. She is a girl learned in fine arts. Being proficient in yoga she can master herself in Siddhavidyā initiated by Nārada and is capable of bringing Aniruddha from Dvārakā to Śoṇitapura without the knowledge of anybody.

Since all these characters as well as Śrikṛṣṇa, Balarāma, Pārvati, Jayā are puranic characters, there is no need for any elaborate discussion.

(D) Metres—

There are 252 verses in all. The author has composed the verses in the following metres. The number of verses written in each metre is indicated in the bracket following it.

(i) Anuṣṭup (8), (ii) Indravajrā (3), (iii) Upajāti (1), (iv) Upendravajrā (3), (v) Drutavilambita (1), (vi) Puṣpitāgrā (11), (vii) Pṛthvī (6), (viii) Praharṣiṇī (2), (ix) Bhujaṅgaprayāta (1), (x) Mañjubhāṣiṇī (5), (xi) Mandākrānta (2), (xii) Mālabhāriṇī (2), (xiii) Mālinī (9), (xiv) Rathoddhatā (2), (xv) Vaṃśasthavila (2), (xvi) Vasantatilaka (50), (xvii) Śārdulavikrīḍita (96), (xviii) Śālīni (1), (xix) Śikhariṇī (9), (xx) Sundari (1), (xxi) Sragdharā (33), (xxii) Svāgatā (2), and (xxiii) Harinī (2)

It is clearly evident that the author is more inclined towards metres like Śārdulavikrīdita, Sragdharā, Vasantatilaka and so on. There is a prayer to Jvālamukhī by Aniruddha in the Fifth Act. It is available in the prose form in all the manuscripts and in numbering the verses the scribes of the manuscripts ignored this prayer. However though the prayer is in the prose form it may be described as the Utkalikā type of prose because traces of the metre 'Bhujaṅgaprayāta' are noticed in it. The verse form of the prayer has been suggested in the Appendix, Page—93

(E) Poetic excellence—

The author has displayed real poetic brilliance in the verses describing the lovely beauty of nature as well as men in their proper perspectives. The human sentiments quite natural in the youths are presented in touching words. There are impressive depictions of love and war in the traditional dramatic way.

The ladies remain away from their lovers inspite of their requests, but at the advent of spring these ladies themselves feel prompted to go and meet their lovers—

प्रणयकलहवत्यः प्राग्युवत्यः प्रियाणां
प्रणतिभिरभियानं प्रक्षिपन्ति स्म मानम् ।
पतिवसतिमिदानीं स्वैरमेताः समेताः
भवति बलवतः किं दुष्करं माधवस्य ॥ [14]

As in general the Indian poets are loud in description of the spring so the author in his account speaks of the beauty and grandeur of the spring in his verses. The spring is depicted in the following verses—

सद्यो रसालवकुलादरयौगपद्याद्धत्ते गतागतमलिप्रकरो न तृप्तिम् ।
पान्थैः कुहूरिति तुहीति रुतं पिकानां भूयो हि रूपमुपलब्धमुदेति चेदम् ॥ [15]

× ×

विदधति नवताण्डवाभियोगं तरलितपल्लवपाणयो व्रतत्यः ।
अनुसरदलिजालकाकलीभिर्मरुदुपवीणयतीव पञ्चबाणम् ॥
पीतायामपि सम्प्रति प्रतिदिनं पुंस्कोकिलग्रामणी
चञ्चूच्छिष्टरसालबालकलिकामध्ये मरन्दस्रुतौ ।
नालीनां निकुरम्बमम्बुजलतात्रातैकसम्बर्त्तकं
प्राचीनत्तुं विधीयमानमधुदुर्भिक्षादिव प्रीयते ॥ [16]

The beauty of the heroine is described very often in verses pregnant with emotions and feelings The pre-nuptial beauty of Uṣā is described by Virabhadra in the following manner—

भङ्गी नर्म न चक्षुषोरजनि न भ्रूवल्लीहल्लीशकं
धूलिकेलिमनोऽपि नापविरतिं नाकूतगर्भा गिरः ।
नेत्रे द्वित्रिदिनादिपङ्कजमुखी शङ्काचले केवलं
लीलामण्डपभित्तिबन्धरचना चित्रे रहो मुञ्चति ॥
व्यक्ता नैव नितम्बबिम्बगरिमा तिक्ता न रोमावली
व्यक्तं नापि वलित्रयं न च तया लावण्यमन्यादृशम् ।
एतस्या परमद्य कञ्चुलिकया संगोपनीयं मुहु-
मन्दोच्छूनमुरुसरोजमुकुलद्वन्द्वश्रियं निन्दति ॥ [17]

---

14. M N.—Act I. Verse-7
15. M, N.—Act II. Verse-10
16. M. N.—Act III. Verses-1, 2.
17. M, N.—Act. II. Verse-8,9.

As medicine is to a patient and water is to the thirsty so is Uṣā to Aniruddha. Her youthful beauty is depicted thus in the words of the lover Aniruddha—

बसन्तवसतौ वने मकरकेतने कौतुका·
दिहैव पिहिते स्थिता रतिरियं किमेकाकिनी ।
दिवो निभृतमागतं सुचरितत्त्वयेवा स्वयं
पुरूरवसमुर्वशी मृगयितुं किमुर्वीगता ॥

पाणौ यन्निहिताविह श्रुतियुगं भूवल्लरीश्रृङ्खला
वेणीबन्धकशानिशं चनयनच्छाया पुनस्तद्भ्रमि ।
तद्बन्दीकरणाय विश्वतरुणश्रेणीदृशां कल्पिता—
कारामाकरकेतबीति वदनं वामभ्रुबो मन्महे ॥

लावण्यार्णवमोनकेतनतिमिक्रीड़ोर्मिनमोदय-
त्तिप्तिश्चञ्चतिकम्बुरम्बुजदृशः कण्ठोऽयमस्याः किमु ।
वक्षोजाचलचारुयौवनस्तक्तम्बेरमाडम्बरो-
दस्ता काचन वल्लरीयमपि कं रोमावली शोभते ॥ [18]

The author has described the old age in the words of Kañchukī in the following manner—

अत्युच्चैर्यदि चोच्यते न विषयस्तद्भारतीकर्णयोः
भ्रूलेखा न नियम्यते यदि दृशौ तन्नालमालोकितुम् ।
यष्टिर्यद्यवलम्ब्यते न तदियं पङ्गोरिवाङ्घ्रिद्वयी
मोघा मे जरया तदिन्द्रियपरिपाकः कथं वर्त्तते ॥ [19]

Aniruddha is a grand-son of Śrikṛṣṇa, the king of Vṛṣṇis and is the husband of Uṣā. He is, as described by Virabhadra, great in valour like Paraśurāma and handsome like cupid.

शस्त्रागमे किमपरो जमदग्निजन्मा
सौन्दर्य्यसम्पदि च पञ्चशरः किमन्यः ।

18. M. N.—Act VII Verses-11-13
19. M. N.—Act II Verse-2

सोऽयं युवा गिरिभुवा विनिवेदितः स्या –
दस्याः प्रतीहि हृदयानभिसन्धिबन्धुः ॥ [20]

During the summer noons the swan rests beneath the lotus leaf in the pond, deers run here and there and the pea-hen protects herself from the sun unfolding its plumages. All feel restless due to the scorching rays of the sun –

व्यर्थं वेद्मि गतागतानि रचयन्नाचक्रवालाचला-
द्देवो वेदमयत्विषांपतिरयं जागर्त्ति नक्तं दिवम् ।
अध्वन्याहिमरीचिसंचयपरीरम्भात्तघर्माम्भस-
श्छायायामधिरस्य सम्यगधुना संज्ञाभुरीकुर्वते ॥[21]

The aerial view of the earth is described thus in the words of Bhṛṅgi—

एते सद्यो विभक्ता इव जलनिधयो निर्वमन्तीव पृथ्वीं
कायव्यूहं गृहा कुर्वत इव विटपिश्रेणीरुत्तिष्ठतीव ।
आक्रामन्तीव तीराण्युपरचितरयाः संचयान्निम्नगाना—
मुर्वीगर्भादिवैते दिशि दिशि गिरयस्तावदाविर्भवन्ति ॥ [22]

The author in the words "Sādhịyānayamutkaladeśaḥ" expresses his deep love and respect for his motherland 'Utkala' and sings the glory of her famous places like Puri, Bhubaneswar and Virajākṣetra with a special mention of the river Bhārgavi on the bank of which he might have been brought up.

दिष्ट्येदं लवणोदरोधसि मिथः संघट्टितोर्मिच्छटा
वेगोत्कूलितशृङ्गवद्भगवतः क्षेत्रं पुरो दृश्यते ।
यत्रायं सहवासि सिद्धशबरीविश्रम्भसम्भावितो
देवो नीलवसुन्धराधरदरी कण्ठीरवः क्रीड़ति ॥

पद्मापतेरयमुदञ्चति नीलशैलः
सस्वर्णकूटशिखरी च मृगाङ्कमौले ।
मध्ये विवर्त्तितदुकूलितमोत्तलक्ष्मी
वक्षोजयोरिव ययोर्भृगुनिम्नगेयम् ॥

20. M. N — Act II Verse-15.
21. M. N.— Act IV Verse-27.
22. M.N — Act. V Verse-3.

प्रायो कामयत प्रजापतिरपि स्वापत्यमत्याहिते--
हेतुं तत्र रजः प्रजल्पति जवः कीर्त्तौ च तद्वर्जनम् ।
ब्रह्मोपासिन ते रजो न च तमः सत्त्वं न वा तत्त्वतो
वेदान्ता ब्रुवते विशिष्य विरजा नाम्ना यदाम्नायते ।।[23]

The wide range of knowledge and deep experience of life of the author are revealed in the lines of the drama. Some of the epigramatic lines from different verses quoted below will prove the intensity and depth of knowledge of the author, The nos. of canto and verse are noted against each.

भवति बलवतः किं दुष्करं माधवस्य ।। १-६ ।।
प्रायो भवन्ति विभवः शिथिलानुरागाः ।। १-२१ ।।
होलाकामिव चन्दनाचलवनीवाता मुहुः कुर्वते ।। २-११ ।।
न खलु जननभेदेऽपीत्यनादिः प्रवादः ।। २-१७ ।।

पन्थाः पैतृपितामहो हि विदुषां दोषाय नोदञ्चति ।। ३-३० ।।
स्थानेऽलीकविशङ्कया युवतयोऽसूयन्ति यत्प्रेयसे ।। ४-१४ ।।
मानो ह्रिया व्रतमिति व्यपदिश्यते किम् ।। ४-१६ ।।
लक्ष्मीनायकमिन्दुमित्रनयनं कस्तावदुल्लंघयेत् ।। ५-२३ ।।

जनोऽनुरागे किमुपेक्षणीयः ।। ६-३३ ।।
निधिमिव विधियोगात्प्राप्य धन्यो भवयेम् ।। ७-२३ ।।
कस्तूरिकापरिमलं न तिरोदधाति ।। ८-२ ।

There are accounts of many other aspects like love, war, pleasure-garden, evening beauty etc. which stand as evidence of the poetic point of view and the capability in dramatic illustration of the author.

Editorial Note—

We have not given here a full length discussion of all the aspects of the writer and his work. Only a brief critical survey of the work has been attempted.

---

23. M.N.—Act V Verses 4, 6, 7.

The manuscript appears in print for the first time, Inspite of sincere efforts for bringing out a mistake-free edition it has not been possible to do so and we hope that inspite of the minor printing mistakes that have crept in, the book will carry its message. However an errata has been appended for the benefit of the readers.

We are thankful to the authorities of the Utkal University who have permitted us to utilise their manuscripts. Thanks are also due to Pandit Nilamani Mishra, Curator, Sanskrit Studies, Orissa State Museum and Sri Srinibasa Ratha of the manuscript section of the Utkal University for the personal interest they have taken in this regard.

Śrāvaṇī Pūrṇimā
The 28th. August, 1977.

Bhagaban Panda
Editor.

* मधुरानिरुद्धनाटकम् *

—अङ्कान्तर्गतविषयाः—

— नाटकीय-पात्रपरिचय: —

पुरुषा:—

सूत्रधार:	...	प्रधाननट: ।
नटी		सूत्रधार-सहकारिणी ।
माधव:		द्वारकाधिप: ।
बलदेव:	...	माधवाग्रज: ।
शिव:	...	कैलासपति: ।
प्रद्युम्न:	....	माधवपुत्र: ।
नारद:	...	ब्रह्मण: पुत्र: ।
अनिरुद्ध:	....	प्रद्युम्नतनय: माधवपौत्र: ।
बाण:	...	राक्षसपति: शोणनगराधिप: ।
कुम्भाण्ड:	...	बाणस्य मन्त्री ।
वकुलाङ्क:	....	अनिरुद्धस्य सहचर: ।
पर्वत:	...	नारदस्य सहचर: ।
भृङ्गी:	...	शिवानुचर: ।
वीरभद्र:	...	बाणस्यानुचर: ।
कञ्चुकी:	...	अन्त: पुरचरो वृद्धब्राह्मण:
ज्योतिषक:	...	रत्नपुरवास्तव्य: ।

देवगण: राक्षसगणश्च ।

स्त्रिय:—

पार्वती	..	शिवपत्नी ।
प्रियम्वदा		बाणमहिषी ।
उषा	...	बाणनन्दिनी ।
मकरिका	...	प्रियम्वदाया: सखी ।
चित्रलेखा	....	उषाया: सहचरी ।
जया	...	बाणस्यान्त: पुरचारिणी ।
देवी	...	ज्वालामुखी ।
नारी	...	पूजोपहारधारिणी ।

मधुरानिरुद्धनाटकम्

श्री गणेशाय नमः

—प्रथमोऽङ्कः—

भद्राय स्मितकौमुदीमधुरिमास्येन्दु[1] दधद्वासुके-
रालोकादिव लीयमानपवनादालीढ़नासापुटम्[2] ।
तेजः किञ्चिदमन्दमैन्दवमहः सन्दोह[3] निःस्यन्दना-
वस्कन्दादिव[4] जातनिद्रनयन[5] व्याजाम्बुजं[6] जायताम् ॥ १ ॥

अपि च—

प्रव्यक्तरक्तरुगलक्तनवातपश्री[7]
विश्रान्तितो नखमयूखमरन्दगर्भम्[8] ।
वन्दे पुरन्दरवधूकवरी कदम्ब[9]-
रोलम्बचारुचरणाम्बुजमम्बिकायाः ॥ २ ॥

[नान्द्यन्ते सूत्रधारः]

सूत्रधार :—अलमति विस्तरेण । भोः सभासदः । जटापटलकैतवोदितनिटिलनेत्र-दहनार्चिचरुदञ्चितस्य सकलकलुषकरिवलदलन[10] सार्थकीकृतपञ्चवदना-भिधानस्य गाढ़ालिङ्गनलग्नगौरीकुचकस्तूरिका पङ्कनिकरायमाण नीलिम-रमणीयकण्ठस्य भगवतो हरिणाङ्कचूडामणेर्यात्रायामुपस्थानीयान् वो विज्ञापयामि । अमी चास्मदीयाः कुशीलवाः किमप्यभिनेतुमुत्कण्ठन्ते ।

---

1. (क) ०मधुरमास्येन्दुं ।
2. (घ) ०रालोत ।
   (ङ) नालीढ ।
3. (घ) सत्येह० ।
4. (ङ) बस्कन्धादिव ।
5. (ख घ) ०निद्रनयना ।
6. (ख घ) नव्याम्बुजं ।
7. (घ) ०नवापतपश्री ।
8. (ङ) रक्तं प्रसक्तिभिरलक्त नवातपानां खेलन्नखालि सुषमा मकरन्द बिन्दु ।
9. (खघ) नितम्ब गर्भम् ।
   'ख' पुस्तके नितम्बस्य पार्श्वे 'कद' इति लेखोऽस्ति ।
10. (ङ) नरिदलन ।

चेतोऽवगाह्य[1] भवतामपि भूतभर्त्तृ-
यात्रा[2]वलोकनविनोदभरावरुद्धम् ।
अद्यास्मदीयनवनर्मरसः प्रसह्य
श्लाघ्यं[3] मनः प्रियकरीमुररीकरोतु ॥ ३ ॥

तदाज्ञापयत किं नाम रूपकमभिनेतव्यमिति । [आकाशे कर्णं दत्त्वा] किमाज्ञापयन्ति भवन्तः । मधुरानिरुद्धं[4] नाम रूपकमभिनेतव्यमिति । [सवैक्लव्यम्] कतमः पुनरस्य रूपकस्य[5] रचयितेति न स्मरामि । [पुनराकाशे]

देवोऽजायत रामचन्द्र धरणीभर्त्तुः स मर्त्त्योत्तमा-
न्म्लेच्छोत्सादनकर्म्मणि प्रथमतः कल्किप्रथां बिभ्रतः ।
क्षौणीभृद्गण[6] मौलिदत्तचरणः कृत्वा जनैकस्थितिं[7]
धीरः स्वात्मनि वीरकेशरिपद[8] यः सान्वयं मन्यते ॥ ४ ॥

तद्देश नित्यवास्तव्य[9] : स्तव्यः सत्कविकोविदैः ।
अस्य कर्त्ता प्रबन्धस्य चयनी चन्द्रशेखरः ॥ ५ ॥

सूत्र — [स्मृत्वा । स हर्षः कम्पनम्] तत्किं रूपकं सकलकोविदावतंसवत्सान्वय पद्माकरसप्त सोमयाजि[10] वाजपेयि गोपीनाथ राजगुरु द्वितीय तनयस्य चयनि चन्द्रशेखर रायगुरोरनन्यसाधारणः सरस्वती निर्यासः । यस्यायं कवेरभिमानः—

श्रोतृस्वात्ताध्वनीनध्वनिबहुलतमां पद्धतिं निर्मिमीथा-
श्छन्दः सन्दर्भगर्भं क्षमपदरचनाव्यत्ययान्निर्जिहीथाः ।
नालङ्कारान्न रीतिरपि न गुणगणं चोज्झितुं[11] श्रद्दधीथा
यद्याविर्भाविनी स्याः स्वयमपि कविते देवि विज्ञापयामि ॥ ६ ॥

---

1. (ख ग घ) ०विगाह्य ।
2. (ख ग घ)०भर्त्तुर्यात्रा ।
   (ङ) भर्त्तृ यातावलोकन।
3. (क ख)०श्लाघा ।
4. (ङ) उषानिरुद्धं ।
5. (ख घ) प्रबन्धस्य
6. (ख ग ङ) क्षोणी ।
7. (क ग ङ) जनैकस्थिति ।
8. (क ग ङ) वीरकेसरिपदं ।
9. (ङ) नित्यरास्तव्यः
10. (ङ) पद्माकर दिनकर सप्तसोम याजि ।
11. (घ) नोजितुं । (ङ) वोभृत (ग) वोज्झित

अपि च—

यद्यस्मद्वचसामवद्यगणना गोष्ठीमधिष्ठापका[1]
निर्व्रीडाः कवयन्ति[2] नाम न वयं तेनाद्य[3] दूयामहे ।
यानन्तोऽपि कवीनिमानभिदधुर्ये[4] वाग्वधूवल्लभा-
स्तानालोच्य परं विषीदति मतिः कुर्मः किमत्रौषधम् ॥ ७ ॥

[विचिन्त्य, सप्रश्रयं च] भोः परिषत्प्रधानान्यार्यमिश्राः प्रसीदत, तत्खलु तस्य कवेरान्विक्षिकी चिन्तनैकतानता[5] वषय धीषणा परिचयःदो रूपकं नैव शक्या-भिनयमिति । [पुनराकाशे कर्णं दत्वा] किं ब्रूथ, किं ब्रूथ । यद्येवं साहसादितो विरम्य गम्यतामिति । [कपाले[6] करतलमास्फोट्य] कथमत्रैव परिषदा र्य्यमिश्राणामाग्रहस्तद् भवतु । गृहिणीमेव गुरूकृत्य कष्टेनाभिनयं प्रवर्त्तयामि[7] ! [इति नेपथ्याभिमुखमवलोक्य] आर्य्ये ! इत इतस्तावत् ।

नटी—[प्रविश्य] इअम्मि[8], आणवेदु अज्जो ।
(इयमस्मि । आज्ञापयत्वार्य्यः)

सूत्र—आर्य्ये ! एते खलु सभासद अज्ञापयन्ति मधुरानिरुद्धं[9] नाम रूपक-मभिनेतव्यमिति । तद् भवती गायतु ।

नटी—ता कधेहि कदमं क्खु समअं आलम्बिअ गाइस्सम् ।
(तावत्कथय कतमं खलु समयमालम्ब्य गास्यामि)

सूत्र—[सर्वतोवलोक्य] आर्य्ये ! वर्त्तमान वसन्तसमयमालम्ब्य ।

नटी—[गायति]

विरहि जणाणं[10] जीअं क्खणे क्खणे[11] भक्खिदु पउत्तस्य ।
विलसइ जुइ कलिआगणो अणङ्गस्स दन्तपन्तिव्व ॥ ८ ॥

---

1. (ग घ) मधिष्ठापका ।
2. (ख घ) कवयन्तु ।
3. (ग) तेनादि ।
4. (घ) नभिवधू ।
5. (ख घ) नैकतामय ।
6. (क) कपोले ।
7. (ख घ) प्रवर्त्तयिष्यामि ।
8. (ङ) इयम्मि ।
9. (ङ) आज्ञापयन्त्युषानिरुद्धं ।
10. (ग) अणाण ।
11. (ग) खणे खणे ।

(वरहिजनानां जीवं क्षणे क्षणे भक्षितुं प्रवृत्तस्य[1]।
विलसति यूथीकलिकागणोऽनङ्गस्य दन्तपङ्क्तिरिव[2]) ॥

सूत्र—[सानन्दम्] आर्य्ये तवानेन गानेनाऽऽकृष्टहृदयो वसन्तं तावदहमपि वर्णयामि।

यथा—

प्रणयकलहवत्यः प्राग्युवत्यः प्रियाणां
प्रणतिभिरभियानं प्रक्षिपन्ति स्म मानम्।
पतिवसतिमिदानीं स्वैरमेताः समेताः
भवति वलवतः किं दुष्करं माधवस्य ॥ ६ ॥

[नेपथ्ये]

भद्र ! शैलूषावतंस ! एवमेतत्। किं नाम दुष्करं जगदुत्पत्तिस्थितिप्रलय शिल्पिनो[3] वलदेवसहचरस्य माधवस्य ?

नटी—[ससंभ्रमम्] अज्ज ! को एसो भवदोय सिलोकाञ्चलं गेह्निअ तुमं शैलूसावत उसत्तिअ हिणन्दन्ति ?

(आर्य्य ! क एष भवदीय श्लोकाञ्चलं गृहीत्वा त्वां शैलूषावतंसेत्यभिनन्दति ?)

सूत्र—यत्सत्यं मयापि नोपलक्षितम्। भवतु प्रतीमस्तावत्। [नेपथ्याभिमुखमवलोक्य]

अये !

समग्रसङ्गीतरहस्यभङ्गी विशारदः शारदनीरदाभः।
देवर्षिरेष प्रसभं नभस्तश्चञ्चद्विपञ्ची[4] रवमभ्युपैति ॥ १० ॥

नूनममुना नारदेन देवकार्य्यं किमपि मन्त्रयितुमागतेन भवितव्यम्। तदेतस्य महान्तमर्थमभिचिन्त्य भूताविष्टस्येव चेष्टमानस्य पुरतो नातीव प्रयोजनमस्मदवस्थानम्[5]। [इति निष्क्रान्तौ]

---

1. (ख घ) समयर्थस्य।
श्लोकारम्भे 'रवया'।
इत्युल्लेखोऽस्ति।
2. (घ) पङ्क्तिरग
3. (ख घ) शिल्पिकल्पिनो।
4. (ख घ) चलद्विपञ्ची।
5. (क ख ग) स्थान इति।

—प्रस्तावना—

[ततः प्रविशति यथा निर्दिष्टो नारदः]

नारदः— [भवति बलवतः किं दुष्करं माधवस्येति पठित्वा] कथं च वाणः पिनाकपाणिवरदानसम्प्रदानं गरुड़ध्वजेन जेतव्य इति संशयानस्य ममेयमेवोपश्रुतिः । [परिक्रम्य । साशंसम्]

स्वस्यैवावरजस्य कैटभरिपोर्भोगीन्द्रभोगायतौ
हेलान्दोलित शोणपत्तनपती[1] बाहू कदा संमदात् ।
पौलोमीपरिरम्भपीड़नघनप्रक्लिष्टवक्षस्तटी
चञ्चुर्निर्भर भूरि घर्मसलिलो वास्तोष्पतिस्तोष्यति[2] ॥ ११ ॥

भवतु, देवकार्य्यं प्रति माधवमुद्बोधयिष्यामि । [पुरो गत्वा] दिष्ट्या एष माधवः[3] कादम्बिनी विनीलच्छविरनेन शारदाम्भोसोदरेण[4] बलदेवेन कमप्यपङ्क्षीणं[5] प्रसङ्ग मुपन्यस्यन्[6] सभामध्यमध्यास्ते ।[विचिन्त्य]

द्राघिष्ठा परमेष्ठि नैकरसना निष्ठ्युत भोगावली
श्रुत्वा यावदवातरद्वसुमतीमेष स्वयम्भूः प्रभुः ।
प्रायः प्रागिव तावदद्य भजति ब्रह्मर्षिवर्षीयसां
सन्दोहेन न सङ्कटत्वमभितो वैकुण्ठघण्टापथः ॥ १२ ॥

अपि च—

पृष्ठवानेन हतानरीनुपयतः किन्वद्य लक्ष्मीपति-
र्द्धाम स्वीयमनुग्रहिष्यतितरामित्यादरादग्रतः ।
तैरेतैश्च नहीति हन्त कथिते वैकुण्ठवेश्मन्यथो
वर्त्तेते विजयो जयश्च विमनीभूयैव[7] दौवारिकौ ॥ १३ ॥

---

1. (घ) पत्तनपति ।
2. (क) वास्तोष्पतिः स्तोष्यति ।
3. (ख घ) 'माधव'शब्दो नास्ति ।
4. (ख घ) सुन्दरेण ।
5. (ग) अपङक्षीणं शब्दो नास्ति ।
[अस्यार्थः—अपङक्षीणं अविद्यमानानि षड्क्षीणि यत्र । स्वार्थे खः । अक्षिशब्दोऽत्र श्रोत्रे निरूढे वर्त्तते । जनद्वयान्तर्गतमन्त्रणा ।]
6. (घ) न्यस्य ।
7. (घ) भूत्यैव ।

[यावदेनावुपसर्पयामीति, तथा करोति । ततः प्रविशतो यथानिर्दिष्टौ बलदेव माधवौ ।]

बल— माधव ! निर्व्यूढप्रायमेव देवकार्य्यमद्य[1] मन्यामहे । तथाहि—

कंसकेशिवकधेनुकचैद्य[2] म्लेच्छमागधमुखेषु हतेषु ।
मेदिनीमनतियत्नमहीनामीश्वरः स लघुमद्य विभर्त्ति ॥ १४ ॥

माधव — आर्य्य ! एवमेतत् । तथापि यावज्जीवमस्माभिर्देवार्थमविरतोद्यमैरवस्थेयम् ।

नारदः —[अवसरस्तावदयमेव दर्शयितुमात्मानमिति । तथा कृत्वा] विजयतां भवन्तौ ।

उभौ —[ससम्भ्रममुत्थाय प्रणम्य च मुनियोग्यमासनं प्रयच्छतः । नारद उपविशति । उभौ उपविशतः ।]

नारदः — अपि क्षेमं भवतो भवदीयानां च ?

माधवः — भवदाशी प्रसादेन ।

बलः — किं पुनरपादानं स्थानमागतस्य भगवतो भविष्यति ।

नारदः — त्रिपिष्टपम् ।

बलः — अपि नाम नाकचक्रवर्त्ती मोदते ?

नारदः —[सवैक्लव्यम्] कथमीदानीं व्यसनसिन्धुमग्नो मोदतां नाम ?

माधवः —[ससम्भ्रमम्] किं पुनर्व्यसनं शतक्रतोः ?

नारदः — अवहितौ शृणुतम् । अपि कर्णातिथिर्भवतोऽपर्णापतिप्रणयास्पद-प्रवीराणामग्रणीर्वाणः ।

आस्ते बाहुविहङ्गिका[3] गणगृहीताखण्डलक्ष्मीभरो
लब्ध्वा शोणपुरीमुरीकृतवतीं यः स्वैकपत्नीव्रतम्[4] ।
यस्याभ्यस्यति[5] सौख्यशायिनिकतां स्त्रीपुंसवाक्सङ्कर
द्वैविध्योज्झरदक्षरं स भगवानप्यर्द्धनारीश्वरः ॥ १५ ॥

अपि च—

कण्ठीरवोरगवशात्कट नीलकण्ठौ[6]
प्रायः प्रकाशयितुमक्षमयोः समक्षम् ।

1. (ख घ) देवकार्य्यं ।
2. (क) चैदि ।
3. (घ) विहङ्गका ।
4. (घ) यस्यैकपत्नी ।
5. (घ) यस्याभूत् साति सौख्य ।
6. (घ) वशाकट नीलकण्ठौ ।
(ङ) वशात्तटकेकिनौ स्वौ ।

हेरम्बतारकजितोरिव विप्रलम्भ-
दुःखादपत्यकृतकी कुरुतः शिवौ यम् ॥ १६ ॥

तेनातिमात्रमुद्वेजितो वृद्धश्रवा इदानीमवसीदति ।

माधवः — [निःश्वस्य] अहो कदाचिदपि नेतृपदवीमादाय महेन्द्रस्य सौख्यमस्ति ।

नारदः — माधव बलदेव अपि नामैतद्व्यसनोदधेर्वृद्धश्रवसमुद्धरिष्यतो भवन्तौ ।

माधवः — [स्वगतम्] कथमिदानीमस्मास्वेतावन्तं भारं शनैः शनैरिवारोपयति भवान् ।
[प्रकाशम्] भगवन् यथाशक्तिः यतिष्यावहे ।

बल — [विहस्य] आः किमत्रापि शङ्का सङ्कोचयति प्रतिज्ञां, बाणो निर्वहणीय इति कियदेतत् ।

माधवः — आर्य्य ! किमेव ब्रवीषि । बाणो हि समरसम्प्रदाय—प्रवर्त्तकानामग्रेसरो मनसापि स नावमन्तव्यः ।

नारदः — सीरायुध[1] ! युक्तमुक्तं गोविन्देन । कोऽप्येष विरोचनान्ववायकीर्त्तिकेतुर्बाण इति । येन हि समरोत्सादितेष्वमरेषु ।

सद्यः प्रपद्य[2] निजमित्रतया त्रिनेत्रं
तद्गाहितो यमभिगम्य च सम्यगेव ।
जन्मावधिद्रविण रक्षणकर्म्मदक्षः
कोपाधिकारमलकाधिपतिर्बिभर्त्ति ॥ १७ ॥

मोदेते किल दण्डपाशिकपदं प्राप्य प्रचेतो यमौ
लब्ध्वा नन्दति चैष गन्धवहनश्चाराधिकारं यतः ।
जन्मारभ्य परानुवृत्त्य विषयो येनाद्य निष्कासितः
कष्टेनैव सुमेरुसानुकुहरे वृद्धश्रवा जीवति ॥ १८ ॥

अपि च—

यस्याद्य स्वरितवाचं विधिरपि कुरुतेऽन्योऽन्य मुत्कण्ठमाना
वैरायन्ते मरीचिप्रभृतय ऋषयो यत्पुरोधः पदव्यै ।

---

1. (क ग ङ) शीरायुध ।
2. (ग) प्रसाद्य ।
(घ) प्रसद्य ।

किं भूभो ब्रूमहे यत्प्रणयपरवशी भूयमध्येऽवरोधं
सैरिन्ध्री सौविदल्लाविव[1] गिरितनया चन्द्रचूडौ ध्रियेते ॥ १९ ॥

माधवः—[चिरं विमृश्य] दुर्जयस्तावदयमिति प्रतीमः ।

नारदः—माधव[2] ! सत्यम् । परन्तु[3] मन्त्राधीनाः सिद्धय इति सर्वशास्त्रमाद्रियते ।

माधवः—यत्सत्यं प्रभावोत्साहशक्तिभ्यामपि गरीयसी मन्त्रशक्तिः ।

बलः— [विहस्य] आः शोणनगर्यामाक्रान्तायामाक्रान्तो बाण इति किमत्र मन्त्रेण ।

माधवः—[सस्मितम्] किमद्यापि नाकर्णितमार्य्येण ।

सन्तापश्लपिताष्टदिक्करिकराम्भो बिन्दुसेकाभितः
सेङ्कार[4] श्रवणावधानबधिरस्वर्णाथकर्णोदरे ।
नित्यावासिपिनाकि भालनयन ज्वालाजटालप्रभे
तत्पारे पुरिहव्यवाहनदशा कैः शालभीलभ्यते ॥ २० ॥

बलः— तद्भवतु बाणराजधानी प्रवेशायैव तावदुपायः प्रथममन्वेषणीयः ।

नारदः—अस्माकमप्येतद् विवक्षितम् ।

माधवः—[चिरं विमृश्य] भगवन्[5] ! प्रतिपन्नस्तावदत्रोपायः । इह हि गरुत्मानेव योज्यः । स च कामरूपी त्रोटी[6] ? सहस्रानीतरत्नाकरनीरो वैश्वानरं शमयिष्यत्यनन्तरं च सुप्रवेशा बाणनगरीति ।

बलः— [सश्लाघम्] शोभनं मन्त्रयति माधवः ।

माधवः—कथं भवानत्र तूष्णीमास्ते ।

नारदः—माधव ! साधीयानेव तव चेतसी ज्वलितवानुपायदोपो जगत्तमः शमयितुं[7] किमत्र ब्रूमः । किन्तु समरावसरे प्रद्युम्नेनापि युवयोस्तृतीयेन भवितव्यम् । मायाविनो हि मायाविभ्यः पर्य्याप्नुवन्ति ।

1. (ग घ) सौविदल्लाविव ।
2. (ख ग घ) माधव शब्दो नास्ति ।
3. (ख घ) परं ।
4. (क) सेङ्कार शब्दो नास्ति ।
(ङ) सेकार ।
5. (घ) भगवन् शब्दो नास्ति ।
6. (घगख) त्रोटि त्रोटा—पक्षो, मीनभेदः ।
7. (ख घ) जगत्तमः शमयितुं ज्वलितवानुपायदीप इति लेखोऽस्ति

बलः— तर्हि साम्प्रतमेव त्वरामहे[1] ।

नारदः—नहि नहि । कथमशिथिलप्रेमणि चन्द्रचूडामणौ बाणो विजीयेत ? तद्यदाहमस्य[2] तत् प्रेमशैथिल्यमालोच्य पर्वतेन पत्रिकां प्रेषयिष्यामि ।

बलः— कथं वा देवस्य कुमारैकदन्तसाधारणे[3] बाणे प्रेमाश्लथः स्यात् ।

नारदः—सीरायुध ! किमिदमुपन्यस्तम् ।

दोषावलोकविचलन्मतयः प्रियेऽपि
प्रायो भवन्ति विभवः शिथिलानुरागाः ।
प्रागत्यजन्नरपतिः सगरो हि[4] पुत्रं
स्वं दुश्चरित्रमसमञ्जसमञ्जसैव[5] ॥ २१ ॥

माधवः—आर्य्य ! सत्यम् ।

सेवामात्रवशम्वदा दिविषदः सप्तर्षयो विस्मृत-
स्वध्याया वृपर्ला भवन्त्यहिपतिर्भारादधो दूयते ।
इत्यस्मिन् प्रवलावलेपचपले दैतेयचूडामणौ
देवो हैमवतीपतिर्निजगतिमार्त्तां किमालोकते ॥ २२ ॥

तद् गच्छतु भवान्[6] शोणनगरीमावामपि गरूड़प्रद्युम्नाभ्यामिदमावेदयिष्यावः ।

[इति निष्क्रान्ताः सर्वे]

॥ उपायोपन्यासोनाम प्रथमोऽङ्कः ॥

---

1. (ख घ) साम्प्रतमेव त्वरामहे इति लेखोऽस्ति नारदवचनिकायाम् ।
2. (ख घ) तद्यत्यहमस्य ।
 (घ) ०दन्तस्य धारणो ।
4. (ख घ) सगरोऽपि ।
5. (ग) मसजिसैव ।
6. (क) भगवान् ।

—द्वितीयोऽङ्कः—

[ततः प्रविशति कञ्चुकी । वेत्रयष्टिमवष्टभ्य]

कञ्चुकी—भस्माङ्गरागरचनां पलितेन भूषा
दर्वीकरव्यतिकरं वलिभिर्विभर्ति[1]
सोऽहं विरूपनयनो जरयैव जाये
स्थानेऽधुना न भजते यदि मामनङ्गः ॥ १ ॥

अपि च—

अत्युच्चैर्यदि चोच्यते न विषयस्तद्भारतीकर्णयोः
भ्रूलेखा न नियम्यते यदि दृशौ तन्नालमालोकितुम् ।
यष्टिर्यद्यवलम्ब्यते न तदियं पङ्गोरिवाङ्घ्रिद्वयी
मोघा मे जरया तदिन्द्रियपरिपाकः कथं वर्त्तते ॥ २ ॥

[विचिन्त्य] अद्य खलु जलविहारावसरे पार्वतीवरमुपायै प्रायच्छदेतावदेव श्रुतम् । तत् कथं विशेषतः[2] श्रोष्यामि ।

[पुनर्विचिन्त्य] भगवती रहः सहचरीं जयामेव प्रक्ष्यामि ।

[परिक्रम्यावलोक्य च । आकाशे लक्ष्यं बद्ध्वा] चित्रलेखे ! किमेक द्वित्रिक्रमेणाङ्गुलीः संकोच्य गणयसि ।

[श्रुतिमभिनीय] किं कथयसि ? अद्यारभ्य यावद्वैशाखशुक्लत्रयोदशीं दिवसानिति ।

चित्रलेखे ! किमत्र कारणम् ? अथवा कृतमेतेन प्रश्नेन । जानासि कुत्रेदानीं जयादेवीति ।

[पुनः श्रुतिमभिनीय] किं कथयसि ? सा च वीरभद्रेण किमप्यालपन्ती पुरोपवन-मध्यास्ते इति । तद्गच्छ यथोद्देशम् । अहं तु तत्रैव गच्छामि । [इति निष्क्रान्तः][2] ।

---

1. (ख ग ङ) वलिभिश्च बिभृत् ।
2. (क) निशेषत ।
1. (क-ङ) तद्गच्छ यथोद्देशमहं तु तत्रैव गच्छामीति निष्क्रान्तः पाठोऽस्ति ।

[ततः प्रविशतः[1] जयावीरभद्रश्च]

वीर—जये ! जानासि किमद्यतनीमवस्थां प्रोषिते भगवति कैलासस्य ।

जन्यन्तेऽत्र तथाविधानि न फलान्यारामकल्पद्रुमै-
राक्रन्दद्वनदेवताश्रुलहरी पूर्णालवालैरपि ।
देवी पाणितृणासनस्मरणतो घासादि चासादितं
वैजन्याद्भयवर्जितैरपि मृगैर्निश्वस्य नास्वाद्यते ॥ ३ ॥

जया– अज्ज ! चिरंदणो क्खु सहचरीणं केलासवणदेवदाणं विप्पलम्भो मं उक्कण्ठेदि । ता जानासि तासं को वुत्तन्तोति ।

(आर्य्य ! चिरन्तनः खलु सहचरीणां कैलासवनदेवतानां मामुत्कण्ठयति । तज्जानासि तासां को वृत्तान्त इति ।)

वीर– जानाम्येव । ता अपि तव स्मरन्त्यो दूयन्ते । सम्प्रति हि तासां कैलासकीर-शारिकाभिः प्राचीनभावनावशादधीते भवन्नामनि नेत्रनीरधाराभिराकस्मिकी[2] वर्षावसरप्रवृत्तिरुदञ्चति । [विचिन्त्य] सन्दिष्ट[3] च भवत्यै ताभिः ।

यथा—

अस्मानिव स्मरसि नैव नवप्रवालान्
स्वासिच्यमान जलजीवितमञ्जरीणाम् ।
येभ्यो निवारितवती परिहृत्य पत्यु-
रप्यङ्कपालिसुखमद्रिसुता कुरङ्गान् ॥ ४ ॥

जया—[सास्रम्] कधं दूरगदं पि मं ण विस्मरइ ।

(कथं दूरगता अपि मां न विस्मरन्ति ।)

वीर—किमुच्यते । द्रढीयानेव[4] निरभिसन्धिरनुवन्धः ।

जया—कदागदं पुण अज्जेण ? (कदागतं पुनराय्र्येण ।)

---

1. (क-ङ) सर्वत्र प्रविशतीति पाठोऽस्ति ।
2. (ख घ) ० राकस्मिक ।
3. (क) सन्दष्टं ।
4. (घ) प्रतीयनेव ।

वीर—अधुनैव कैलासपरिष्काराय । तत्र हि कियद्दिनोत्तरमेव भगवता भवत्या सह गन्तव्यम् ।

जया—[सविस्मयम्] कधं क्खु वाणे जीअदि भअवंतत्थ गमिस्सदि ?
(कथं खलुवाणे जीवति भवांस्तत्र गमिष्यति ?)

वीर—[विहस्य] सरले ! नेदिष्ठापचयो वाण एव ।

जया—[ससम्भ्रमम्] सान्तं वावं सान्तं पावम् ।
(शान्तं पापम्,शान्तं पापम्) ।

वीर—स खलु गीर्वाणसर्वङ्कषो वाणो भगवन्तमिदमवादीत् । यथा भगवन्—

प्राचीप्राचीरकल्पोदयगिरिपरिखाडम्बराम्भोधिपाशि-
प्रेयो वाराशितीरे धनदयमदिशावन्तरा च भ्रमन्ती ।
आज्ञामेकापि राज्ञामुपरि[1] विहरते किन्तु संग्रामगोष्ठी
विच्छेदेनोपशान्तिं क्वचिदपि लभते नाद्य दोर्दण्डकण्डूः । ५ ।

अपि च—

नोत्तोलयामि भुवमम्बुनिधेर्विधूता-
नालीककन्दवदियं यदि शूकरेण ।
नोत्पाटयामि च गिरीनुदधौ निरस्ताः
शाखामृगैरुपलकन्दुकवद्यदीमे ।। ६ ।।

जया[2]—हद्धि हद्धि । अदि भूइं गदो क्खु दप्पो वाणस्य । जं देवस्ससंमुहे वि णिट्ठुराइं अच्छराइं भणदि । तदो तदो ।

(हा धिक् हा धिक् । अतिभूमिं गतः खलु दर्पो वाणस्य । यद्देवस्य सम्मुखेऽपि निष्ठुराण्यक्षराणि भणति । ततस्ततः)

वीर—ततो भगवानप्यमृष्यमाणस्तमब्रवीत् । वाण ! यदा तव मयूरध्वजो निपतेत्तदा दोर्दण्डकण्डूरुपशाम्येत् इति । विनिर्गते तस्मिन्ननतिविमनामानो मामुवाच । भद्र ! गत्वा कैलास परिष्कार्य्यो नैतस्यातिगर्वितस्य कल्याणमस्तीति । तज्जये वदामि नेदिष्ठापचयो वाण एवेति ।

---

1. (घ) आकाशे कापि राकामुपरि ।

2. (ख घ) जया छाया इति लेखोऽधिकोऽस्ति

जया—[स्वगतम्] अम्महे महन्तओ कालो जं कत्तिकेअ विणाअक णिव्वसेस-सिणेहभाअणे वाणे भअवं एवं भोदि।

(आश्चर्यं महानयं कालो यत्कार्त्तिकेय विनायकनिर्विशेषस्नेहभाजने वाणे भवानेवं भवति)।

[प्रकाशम्] अज्ज जानाति को तस्स दोदण्डकण्डुं उवसमेस्सदित्ति। (आर्य्य ! जानासि कस्तस्य दोर्दण्डकण्डूमुपशमयिष्यतीति)

वीर—योऽस्य दुहितुः [इत्यर्द्धोक्ते संगोपनं नाटयति]

जया—अज्ज अद्ध उक्तिए एव जाणामि भअवदी वरलम्भोवि वत्साए वाण विणासाए ज्जेव।

(आर्य्य ! अर्द्धोक्त्यैव जानामि भगवतीवरलाभोऽपि वत्साया[1] वाणविनाशायैव।)

वीर—[स्वगतम्] अपीदमियं ज्ञातवती। भवत्वन्यतः क्षिपामि। [प्रकाशम्] जये ! कथमुषायै भगवत्या वरो दत्तः।

अया—अधइं ? (अथ किम् ?)

वीर—कथय कथम् ?

जथा—सुणादो अज्जो। अज्ज णअरपुक्खरिणी णीरे देवेण णिवुत्तविहारमज्जणा भअवदीं प्पेक्खिदुं उसा गदा।

(शृणोत्वार्य्यः। अद्य नगरपुष्करिणी नीरे देवेन निवृत्तविहारमज्जनां भगवतीं, प्रेक्षितुमुषा गता।)

वीर—[सानन्दम्] अप्येवं कौतुकमासीत्। ततस्ततः ?[2]

जया—तदो जावज्जेव किदोक्कण्ठा उसा तदावल्लहेण विहारं अहिलसदि दाव भअवदीए उपेक्खिअ भणिदं वत्से उसे तुमंपि वैशाखसुकल तओदसी रत्तौ यं पुलिसं सवणे प्पच्चक्खी करिस्ससि तेण एवं विहारं ज्जेवअणुभविस्ससीत्ति।

(ततो यावदेव कृतोत्कण्ठोषा तथा वल्लभेन विहारमभिलषन्ती तावद् भगवत्योत्प्रेक्ष्य भणितं वत्से उषे ! त्वमपि वैशाखशुक्लत्रयोदशीरात्रौ यं पुरुषं स्वप्ने प्रत्यक्षी करिष्यसि तेनैवमेवं विहारमनुभविष्यसीति।)

---

1. (घ) वत्सेयम्।
2. (खघ) वीरस्योक्तिर्नास्ति।

वीर—अहो महीयाननुग्रहो भगवत्याः । अथवा किमिदमस्यामधिकम् । यतः—

प्रथमवयसि यस्यै धूलिलीलावसाने
सरभसमवरुद्ध्योत्सङ्गभागे गृहीत्वा ।
व्यतरदनुपमानप्रेमभाग्यं भवानी
रसमुरसिजयोः स्वापत्यपीतावशेषम् ॥ ७ ॥

ततस्ततः ।

जया—तदो णिवुत्ते तत्थ देवस्स विहारे उसा वि अतं ज्जेव भअवदी वअणं सुमरिअ अत्तणो णिवासं गदा । संपदे च दुव्विसहयौवणा कधं पि समअं गमेदि ।

(ततो निवृत्ते तत्र देवस्य विहारे उषापि तदेव भगवतीवचनं स्मृत्वा स्मृत्वा आत्मनो निवासं गता । साम्प्रतं च दुर्विसहयौवना कथमपि समयं गमयति ।)

वीर—किमारूढयौवना कल्याणी ? [विचिन्त्य] भविष्यति । मया हि कियद्दिनेभ्य प्राक् प्रसङ्गेन पुरन्ध्री मकरिका पृष्टा । मकरिके ! कतरदिदानीमुषाया वय इति । तयाप्युक्तं शैशवयौवनयोरन्तरालम् । यतः—

भङ्गीनर्म न चक्षुषोरजनि न भ्रूवल्लिहल्लीशकं
धूलिकेलिमनोऽपि नापविरतिं नाकूतगर्भा गिरः ।
नेत्रे द्वित्रिदिनादि पङ्कजमुखी शुङ्काचले केवलं
लीलामण्डपभित्तिबन्धरचनाचित्रे रहो मुञ्चति ॥८॥

अपि च—

व्यक्तो नैव नितम्बबिम्बगरिमा व्यक्ता न रोमावली
व्यक्तं नापि वलित्रयं न च तथा लावण्यमन्यादृशम् ।
एतस्याः परमद्य कन्चुलिकया संगोपनीयं मुहु—
र्मन्दोच्छूनमुरः[1] सरोजमुकुलद्वन्द्वश्रियं निन्दति ॥९॥

तदिदानीं भवेदारूढयौवना कल्याणी ।

जया—जधावगदं अज्जेण । (यथावगतमार्येण ।)

---

1. (खघ) मन्दोच्छूनमुरः ।
(ग) मन्दोत्सूनभ्युरः ।

[नेपथ्ये]

हला भट्टदारिए इमिस्सिंणिउन्जे कुसुमाइं अवचिणुम्ब । सहि चित्तलेहे इदो विअ अबरं अवचिणुम्व ।

(सखि ! भर्त्तुदारिके ! अमुष्मिन्निकुन्जे कुसुमान्यवचिनुवः । सखि ! चित्रलेखे ! इतोऽप्यपरमवचिनुवः)

जया—[पुरोऽवलक्य] अज्ज एसा वस्सा कुसुमावचअं चित्तलेहा दुदीया इदोज्जेव आगच्छदि । ता एत्थ णिउन्जे अलक्खिदं प्यविसिअ वत्सा एविस्सद्ध विअणाइं जाव सुणुम्ब, [इति तथा कुरुतः]

(आर्य्ये एषा वत्सा कुसुमावचयं कर्त्तुं चित्रलेखा द्वितीया इत एव आगच्छति । तदत्र निकुन्जेऽलक्षितं प्रविश्य वत्साया विश्रब्धवचनानि तावच्छृणुव ।)

[ततः प्रविशतः कुसुमावचयं नाटयन्तौ उषा चित्रलेखा च]

उषा—[चूतकलिकामादाय] सहि ! चित्तलेहे ! एसो अहिणहवन्धणभ्रट्टो चूअमुअलो कणगे गोह्निअदु ।

(सखि ! चित्रलेखे ! एषोऽभिनववन्धनभ्रष्टश्चूतमुकुलः कर्णाग्रे गृह्यताम् ।)

चित्र—सहि ! भट्टादारिए ! तुअवि इमिणा णवमालिआ प्पसवेण असुण्णो कण्णो भोदु ।

(सखि ! भर्त्तुदारिके ! तवाप्यमुना नवमालिकाप्रसवेनाशून्यः कर्णो भवतु ।)

[इत्युभे[1] मिथः कर्णावतंसौ प्रयच्छतः]

वीर—जये ! अप्यवलोकयसि[2] रमणीयमनयोः सौहार्द्यम्[3] ?

जया—आसैसवं क्खु एवम् । (आशैशवं खलु एवम्)

उषा—[सस्मितम्] सहि मा उणो तुमं केदइकुसुमाविचअं करेहि जदो कण्टकदट्ट पओहरासंकाट्ठाणं भविस्ससि ।

सखि ! मा पुनस्त्वं कुसुमावचयं कुरुष्व यतः कण्टकदष्टपयोधराशङ्कास्थानं भविष्यति ।)

1. (ख घ) इत्युभे इत्यनन्तरं उभौ इत्यधिक पदोऽस्ति ।

2. (कग) ०लोकयसि इत्यनन्तरं 'जये' इति लेखोऽस्ति ।

3. (कक) सौहार्दमिति सर्वत्र पाठः

चित्र—[विहस्य] हला सहि किणणिवारेसि कुलकण्णआसदी चुम्बिदं आणणं इच्छन्तं भंअरम्।

(हला[1] सखि[2] ! किं न निवारयसि कुलकन्या[3] सती चुम्बितुमाननमिच्छन्तं भ्रमरम्।)

वीर—प्रवृत्तस्तावदनयो परिहासोपन्यासः।

जया—सुणिअदि क्खु आकूदगब्भा सरस्सदी।

(श्रूयते खलु अकूतगर्भा सरस्वती।)

उषा—सहि इमं पुन्नाअं हत्थेन गेह्णस्स। इदो क्खुदे प्पसवलम्भो भोदु।

(सखि ! इदं पुन्नागं हस्तेन गृहाण। इतः खलु ते प्रसवलाभो भवतु।)

चित्र—हला तुमंज्जेव्व भअवदीवरं पडिवज्जसि अपुन्नाअं अवलम्बिदुं अरहसि।

(हला सखि ! त्वमेव भगवतीवरं प्रतिपद्यसे तत्पुन्नागमवलम्बितुमर्हसि।)

उषा—[चिरं विमृश्य] सहि प्पसङ्गे प्पडिदोत्ति भणम्मि। अवि सच्चं प्पच्चक्खी करिस्सं तत्थ रत्तौ कम्पि।

(सखि ! प्रसङ्गत पतित इति भणामि। अपि सत्यं प्रत्यक्षीकरिष्यामि तत्र रात्रौ कमपि।)

चित्र—आः कधं अण्णधा मण्णेसि ? णंअ वड्चचारिक्खु वअणं भअवदोए।

(आः कथमन्यथा मन्यसे ? नन्वव्यभिचारि[4] खलु वचनं भगवत्याः।)

वीर—अवितथमाह चित्रलेखा। किमेवं[5] वत्सा शङ्कते ?।

उषा—[निःश्वस्य] सहि भअवदीवरदाण दिणादो प्पहुदिउक्कण्ठिदा कधंपि समअं गमेम्मि। कदा क्खु सोदिअसो भविस्सदि।

(सखि ! भगवती वरदानदिनात्प्रभृत्युत्कण्ठिता कथमपि समयं गणयामि। कदा खलु स दिवसो भविष्यति।)

चित्र—[सर्वतोऽवलोक्य] सहि ! अतिदो महुमासो। तवैशाख सुकल उदेसीं जावसअं ज्जेव गणेदु पिअसही।

• •

---

1. (खघ) हला शब्दो नास्ति।
2. (क) सखि शब्दो नास्ति।
3. (क) कुलकन्या शब्दो नास्ति।
   (ख) कुलकन्यका।
4. (क) नन्वव्यभिचारिणी।
5. (क) कमेवम्।

(सखि ! अतीतो मधुमासः । तद्वैशाखशुक्लत्रयोदशीं यावत् स्वयमेव गणयतु प्रियसखी ।)

वीर—[विलोक्य] सत्यमतीतो मधुमासः । सम्प्रति माधवः प्रविशति । यतः—

सद्यो रसालवकुलादरयौगपद्या—
द्वृत्ते गतागतमलिप्रकरो न तृप्तिम् ।
पान्थैः कुहूरिति तुहीति रुतं पिकानां
भूयो द्विरूपमुपलब्ध[1] मुदेति चेदम् ॥१०॥

अपि च—

पुष्प्यच्चूतलतामरन्दमदिरोन्मत्तालिनी गायनी
गीताध्मापितलास्यलोलगणिकाश्रेणीभिरामोदिताः ।
प्रत्युद्बुद्धसरोजसारजरजः क्षोदेन मेदस्विना
होलाकामिव चन्दनाचलवनीवाता मुहुः कुर्वते ॥११॥

उषा—[गणयित्वा । निःश्वस्य] सहि वलवदी उक्कण्ठा कालो दिग्घोत्ति भीसदम्मि ।
(सखि ! बलवती उत्कण्ठा, कालोऽपि दीर्घ इति भीतास्मि ।)

वीर—[सवैक्लव्यम्]

उत्कण्ठा महती तवेयमतनु प्रेयो वयश्चेदृशं
क्रूरश्चाविरभूदभर्तृकवधूसम्वर्त्तकोऽसावृतुः ।
कूजत्कोकिलकाकली मुखरितानिस्तन्द्रचन्द्रातप
स्मेरस्मेरदिशो निशीथसमया गच्छन्तु वत्से कथम् ॥१२॥

अपि च—

सङ्कल्पैकव्यसनवती किं त्वामृतोरन्तमेते
भूयो भूयो विषधरवधूपीतशेषा भवन्तः ।
लोपामुद्रा रतिपरिणति स्वेदमेदस्विगर्भाः
स्फायच्चूताङ्कुर[2] सुरभयो वायवः प्रापयेयुः ॥१३॥

---

1. (ख) भूयो हि रूपमुप ।
(घ) भूयोतिरूपमुप ।
2. (घ) साघ्यंचूताङ्कर

कथं चेमानि मुखरवनप्रिय[1] वैतालिकनिकरकाकलीविरुदनादसादरवसन्त-समयसामन्तरुचिर चामरायमाणसहकार कुसुमकम्पलम्पटी भवन्मलयमारुतानुचर करकङ्कणारवा इव मधुव्रतविरुतानि त्वया श्रूयेरन्। भवतु सर्वथा श्रेयसे[2] भवत्या भगवती[3] ।

चित्र—हला अल एत्थ कादरदाए। (सखि अलमत्र कातरतया।)

उषा— किं कधेसि णं जोअणणिप्पहि आसा दे सहचरी ।
(किं कथयसि ननु जीवननिष्प्रत्याशा ते सहचरी।)

[इत्यवनतमुखो निःश्वसिति ।]

चित्र —[अश्रूणि विमुच्य] हला कधं एवं खिज्जसि। णं भअवदी वअणं ण सम्भावेसि।
(सखि! कथमेवं खिद्यसे? ननु भगवती वचनं न सम्भावयसि।)

उसा—[विमृश्य[4]] सहि सोइं सवणजादो महाउल प्पसूदो रमणीओ वा भविस्सादि।
(सखि! स किं स्वप्नजातो[5] महाकुल प्रसूतो रमणीयो वा भविष्यति?)

वीर—[विहस्य] जये! श्रुतमाभिजात्यमभिरामतां वा वत्सा तावदन्विष्यति नायकस्य?

जया—जुज्जइ एव्व एदं। (युज्यत एवेदम्।)

चित्र—हला को सन्देहो ण हि अणहिजादं अणहि रमणीअं वा तुम्ह णाअकं भअवदी करिस्सदि। सव्वथा जाणीहि सो को दि महापुइसोभि।

(सखि कः सन्देहो नह्यनभिजातमनभिरमणीयं वा तव नायकं भगवती करिष्यति। सर्वथा जानीहि स कोऽपि महापुरुष इति।)

जया—[विचिन्त्य] अज्ज जाणासि कदमो वत्साए भअवदी वअणघडिदो णाअकोत्ति।
(आर्ये! जानासि कतमो वत्साया भगवती वचनघटितो नायक इति।)

वीर—[विहस्य] जये! जगद्रयं बहिरन्तरङ्गभूतं भावि वर्त्तमानं वा यत्किञ्चिज्जानीमः।

---

1. (खघ) मुरवन प्रिय।
2. (ङ) प्रेयसे।
3. (खघ) भवतु...भगवती वाक्यस्यास्य लेखो नास्ति।
4. (क) शब्दस्य लेखो नास्ति।
5. (कखग) स्वानजारो।

तथापि गोपनीयार्थो न प्रकाशनीयस्तावत् । यद्यस्मच्छपथशापिता न कस्मैचित्प्रकाशयती भवती तदा चक्ष्महे ।

जया—[कर्णौ स्पृष्ट्वा] अम्महे कोअअं अज्जस्स अविस्सासोसिस्सेसु ।
(आश्चर्यं कोयमार्य्यस्याविश्वासः शिष्येषु ।)

वीर—तदाकर्णयतु भवती ।

वृष्णीनां विमलान्वयोदयगिरौ पद्मैकशर्म्मप्रदः
संहर्त्तुं भगवानवातरदरिस्तोमान्धकारं हरिः ।
नप्तासप्तपयोधिजांधिक[1]यशास्तस्यानिरुद्धाभिधो
वीरस्ते श्रवणातिथिः कथमसावद्यापि नापादितः ॥१४॥

अपि च—

शस्त्रागमे किमपरो जमदग्निजन्मा
सौन्दर्य्यं सम्पदि च पञ्चशरः किमन्यः ।
सोऽयं युवा गिरिभुवा विनिवेदितः स्या—
दस्याः प्रतीहि हृदयानभिसन्धिबन्धुः ॥१५॥

जया—[सानन्दम्] ण क्खु कमलिणीए मिहिरं अन्दरेण अणुबन्धट्ठाणं कम्पिदेवं करेदि ।
(न खलु कमलिन्याः मिहिरमन्तरेणानुबन्धस्थानं कमपि देवं करोति ।)

उसा—अण्णं च सहि सुणोदु । स किसरिएन्ति अणवरदभावणाए कोवि कन्दोट्टदलसच्छविम्म अणकमणी अमूरत हिअए फपुत्तदि । फपुलिदे अ तहिं णिब्भरामोदजड्डिमजर जरावअवापच्चङ्ग विगलिद णिदाघ णीरकरम्बिदापफुल्लफुलअसन्तति दन्तुरिद उत्थिरिआवसीदम्मि । अकधं मन्दभाइणी जीअस्सम् ।

(अन्यच्च सखी शृणोतु । स कीदृश इत्यनवरत भावनया कोऽपि नीलोत्पलदलसच्छविमर्दनकमनीयमूर्त्तिर्हृदये स्फुरति । स्फुरिते च तस्मिन् निर्भरमोदजड्डिमजर्जरावयवा प्रत्यङ्गविगलित निदाघनीरकरम्बिता प्रफुल्ल पुलकसन्तति दन्तुरितोत्तरीयावसीदामि । तत्कथं मन्दभागिनी जीविष्यामि ।)

---

1 (ब) लंघित ।

चित्र—सान्तं वावं। पडिहदं अमङ्गलं सव्वधात्त अवदिरक्खदि। ता एहि भअवदी सविधं ज्जेव गच्छम्ह।

(शान्तं पापं प्रतिहतममङ्गलम्। सर्वथा भगवती रक्षति। तदेहि भगवती सविधमेव गच्छावः।) [इति निष्क्रान्तौ]

जया—अज्ज कधं अप्पच्च क्खो विअ अणिरुभ्हो वत्साए फुरदि ?
(आर्य्य ! कथमप्रत्यक्षोऽप्यनिरुद्धो वत्सायाः स्फुरति।)

वीर—अस्त्वेवायं[1] सकल शास्त्रसंवादी तावदनिरुद्धो[2]राद्धान्तः। यथा—

तनोति तावद्विषयावरुद्धा—
प्यदृष्टसम्पत्तिसखी प्रबुद्धा।
जन्येन जन्मान्तरभावनैवो—
पनायिकासज्जनकं विलासम् ॥१६॥

अपि च—

यदुवरकुलकेतौ तत्र सौन्दर्य्यसेतौ
स्फुरति पुनरुषायाः पूर्वजन्मानुबन्धः।
विदधति पतिमन्यं वित्तविद्यारमण्यो
न खलु जननभेदेऽपीत्यनादिः प्रवादः ॥१७॥

भवत्वावामपि भगवती सविधमेव गच्छावः।

[इति निष्क्रान्तौ]

इति वसन्तर्त्तु प्रवर्त्तनं नाम द्वितीयोऽङ्कः।

---

1. (क) अस्त्येवायम्।
2. (ख घ) शास्त्रसंवादविरुद्धो।
(ग) ०शास्त्रसंवादीदविरुद्धो।
(ङ) शास्त्रसंवादी तावदविरुद्धो।

—तृतीयोऽङ्कः—

[ततः प्रविशत्यनिरुद्धो वकुलाङ्कश्च]

अनिरुद्धः— [अवलोक्य] सखे ! दृश्यतामयं नृत्यतीव जगति[1] पथिकनितम्बिनी सम्वर्त्तको वसन्तर्त्तुः । तथाहि—

विदधति नवताण्डवाभियोगं
तरलित पल्लवपाणयो व्रतत्यः ।
अनुसरदलिजालकाकलीभि—
र्मरुदुपवीणयतीव पञ्चवाणम्[2] ॥१॥

अपि च—

पीतायामपि सम्प्रति प्रतिदिनं पुंस्कोकिलग्रामणी
चञ्चूच्छिन्नरसालबाल कलिकामध्ये मरन्दस्रुतौ[3] ।
नालीनां निकुरम्ब[4]मम्बुजलतावातैक सम्वर्त्तक—
प्राचीनर्त्तु[5] विधीयमानमधुदुर्भिक्षादिव प्रीयते ॥२॥

वकुलाङ्कः— कथमुन्मनायितं वयस्येन ? तदिदानीमयुक्त[6]मवस्थातुं क्षणमपि सखीं रोचनामन्तरेण ।

अनि— सखे ! न किमप्यवैमि गाढमालीढो विषमशरविषधरेण ।

वकु— सखे ! किमेवं भवसि[7] ।

विभ्रद्विभातरजनीकर पाण्डुगात्रं
लावण्यलेशपरिचेयमणोरणीयः ।
शश्वद्विनिःश्वसित जर्जरवक्त्रलक्ष्मी—
रीदृक्कथं सविधमेष्यति[8] रोचनायाः ॥३॥

---

1. (क ख) नृत्यती वनगती ।
2. (ख) वीणयति विपञ्चवाणम् ।
3. (ख घ) शृतौ ।
4. (खगघङ) निकुरुम्ब ।
5. (घ) प्राचीनं तु ।
6. (घ) तदिदानीमयुक्त ।
   (घ) तदिदानीमनुपयुक्त ।
7. (घ) भणसि ।
8. (कग) सविधमेष्यसि ।

कथं वा सत्यामपि रोचनायामनङ्गमृगयुविशिखविषयान्तःकरणहरिणोऽसि[1] इति विचिकित्सामहे ।

अनि—सखे ! जानीहि । रोचनाशतेनापि नाद्य निर्वृणोति ते वयस्यः ।

वकु— गरीयः खल्वत्रकारणं भवेत् । यदि न गोपनीयं श्रोष्यामस्तावत् ।

अनि—[विहस्य] अपि नाम गोपनियमस्ति किमप्यनिरुद्धवयस्ये । आकर्णय—

लावण्यलक्ष्मी नवनर्मशाला
बाला मम स्वप्नसमागतासीत् ।
तिलोत्तमा साऽथ किमुर्वशी वा
रम्भारतिर्वेति वयं न विद्मः ॥४॥

अपि च—

चिकुरमयतमः समग्रलक्ष्मी
सहसमुदञ्चि[2] मुखेन्दु चन्द्रिका सा ।
रजनि रजनि पञ्चबाणनक्तं
चरमदवृद्धिकरी विलक्षणैव ॥५॥

अपि च —

तरुणीमकुतरामणीयकाम्भो—
भरसरणी[3] जलयन्त्रनालिका वा ।
किमथ मनसिजस्य नासिकाऽस्या—
स्तिलसुमनोमय वीरकाहाला वा ॥६॥

अपि च—

भ्रूवल्लरीकपटधन्व कटाक्षधारा
नाराच संघटनकल्पित काण्डयन्त्रः ।
तस्यांयुवैणमृगया नववागुरायां
किं मन्मथो विनिदधावधर प्रवालम् ॥७॥

---

1. (ख ग) करणोऽसीति । हरिणपदं नास्ति ।
2. (ग) ०मुदञ्च ।
3. (ख घ) काम्भोक्षरसरणी ।

अपि च—

रोमावलीमृगदृश किमुयौवनेभ—
वक्षोजकुम्भविगलन्मद वारिधारा।
किंस्विज्जगत्त्रय विजित्वरमीनकेतु---
कस्तूरिका लिखित कीर्त्तिलिपिच्छटा वा ॥८॥

अन्यच्च—

सौन्दर्य्य सिन्धुलहरी निकुरम्बगर्भ—
निष्ठ्यूत शङ्खनखवन्नखपङ्क्तिरस्याः।
आस्या न शैशवदशामय शैवलिन्या—
भोगस्फुरत्पुलिनवज्जघनस्थली च ॥९।

किं वहुना—

समुल्लसितचन्द्रकं कमपि नीलकण्ठं हठा—
ज्जिघृक्षुरति कौतुकी दधदलक्षणीयं वपुः।
स्ववेष्टन शलाकिकां[1] गुणमयीं वयो ग्राहिणी—
मिमां निरमिमीत[2] किं मकरकेतुवैतंसिकः ॥१०॥

वकु—[स्वगतम्] कष्टमयमनङ्गशरपञ्जरोदरं कीर इव कियदनुभविष्यति। [निःश्वस्य। प्रकाशम्] [आकाशे] सखि! रोचने!

वैरस्यं यदि वल्लभस्य च तदा[3] जीवेयमन्या यथा
जीवत्यश्रुमुखी सखेदमिति या दर्पादवोचं गिरः।
साहं साहसिकी सहे सहचरी स्नेहव्ययं प्रेयसो
दैवं नैवमवेदिषं क्वचिदिति ब्रूया वचः सम्प्रति ॥११॥

अपि च—

शश्वन्निःश्वसितोष्ममर्मरतरव्यस्तेन्दुलेपोच्छ्रयं
पाणिप्रोतमृणाल वल्लिवलयं पद्मच्छदाङ्कशयम्।

1. (ख घ) सवेष्टकशलाकिनीं।
(ग ङ) सवेष्टकशलाकिकां।
2. (क ग) निरममीत।
3. (ख घ) च तथा।
(ग) न तदा।

प्रापं प्रापयिता विशङ्कितशतं प्रायो वयस्यावली
चेतः केतकगर्भगौरिम किमु क्षामं शरीरं न ते ॥१२॥

अपि चोद्दीपनमिति शीतलप्रियापि न वहुधावकीर्णकुसुमजालायां विमल-जलयन्त्रशालायां च दयितहस्तरचितचित्रवन्धलेखायां छायामण्डपलेखायां[1] न स्वैरं सञ्चरत्कोकिलादिनाद-श्रुति-धृति-प्रतिषेधिकायां विहार-वनतरङ्गिणीतीर वेदिकायां च समयमपनयेथाः ।

अनि—[अपवार्य] सखे ! किमित्थमुच्चैरुन्मत्तवदालपसि[2] ? अपि नाम तया श्रूयेत[3] ।

वकु—[विहस्य]कथमद्यापि वयस्यो रोचनाया विभेति ? [निःश्वस्य] सखे ! गतः स कालो यत्र गोत्रमात्रस्खलनादपि मानवतीमेतां चरणतलावनतमौलिरभ्यर्थित सहचरी वचसापि न प्रसादयितुमक्षमत भवान् । वर्त्तमाने तु—

अनधिगतचटुस्तवाविलम्बा—
दितरनितम्बवती वशम्वदस्य ।
अहह सहचरीवचोभिरेव
स्वयमपनेष्यति मानमानताङ्गी ॥१३॥

अनि—कृतमनेन रोचनाप्रसङ्गेन । जानीहि स्वप्नरमणी मृगतृष्णैव दूरमस्मदन्तः करणरङ्कमाकर्षति । [विचिन्त्य] आः किमिदम् ? यत्नेन यच्चित्तविकारः पिहितोऽपि बहिरेति । तथाहि—

यदपि महतो धैर्य्यात्पातः पवेरिव सह्यते
मलयमरुदास्कन्दो मन्दं तथापि नतभ्रुवः ।
स्मरणविषयी भूय स्वप्नानुभूतचरी सखे
निधुवनकलामूर्च्छायै मे प्रयच्छति मानसम् ॥१४॥

वकु—सखे ! स्वप्नमात्र सुलभां तां धैर्य्यमवलम्ब्य प्रस्मर्त्तुमर्हसि ।

अनि—सखे । किमिदमुदीरयसि[3] ?

---

1. (ख घ) छायामण्डपलेखायामिति शब्दो नास्ति ।
2. (घ) किमित्थमुन्मत्तवत् प्रलपसि ।
   (ख) किमित्थमुन्मत्तवदालपसि ।
3. (ख घ) किमिदमुदीरितं नाम ।

प्रस्मारयेयुरितरे विषया वयस्यं
तस्या मनोहरतनोरिति मन्यसे किम् ।
तां पङ्कसङ्कटनदीमिव मत्तनागो[1]
दैवादुपेत्य न मनो विनिवर्त्तते मे ॥१५॥

अपि च—

तामन्तरा मम विवेकविकाशनाशौ[2]
विश्रम्य किञ्चिदसकृत्पुनरेति[3] चेतः ।
क्षीरं सनीरमिव तन्मयमात्मचित्तं
कर्त्तुं पृथक्कथमथ प्रभुरस्म्यहं सः[4] ॥१६॥

वकु—[स्वगतम्] स्वस्तिवाचनमिदं तावदनङ्गबाधाया वयस्यस्य । [प्रकाशम्] सखे ! अपि नाम तां प्रत्यभिजानीषे यां स्वप्ने दृष्टवानसि । क्वचित् प्रत्यक्षतोऽवलोकितचरी वा स्यात् ?

अनि—[संसभ्रमम्] सखे । पश्येयमागतैव मन्मथ[5]तिमिरचन्द्रिका [इत्युत्थायालिङ्गितुमिच्छति] ।

वकु—सखे ! विरम, सङ्कल्पविलसितमेतादृशम् ।

अनि—[निःश्वस्य] अये ! क्व गता प्राणेश्वरी ? सखि ! स्वप्नावसरविहारिणि मदीय-चित्तचौरिका निकामनिपुणे !

अद्याहं परिशीलितो यदि खलु प्राप्तापराधस्त्वया
तन्निर्भर्त्स्य वसेह मानविमना विन्यस्य गण्डे करम् ।
यावच्चाटुवचो वदामि विनती कुर्वे शिरः सर्वथा
दत्वा नोत्तरमेव यासि निरनुक्रोशे किमेषौचिती ॥१७॥

[विमूर्च्छितः पतति]

---

1. (ख घ) नागो ।
2. (ख घ) विकाश विनाशनौ च ।
   (ग) विवेक शब्दो नास्ति ।
3. (ख ग घ) परमेति ।
4. (ङ) अद्यापि तां युगपदुत्कलिका विवेक ।
   वेगोदयादुभयतः [illegible]
   भूयो जहाति न जहाति च [illegible]
   दार्वश्रितीति चमरी च मरीचिकां मे ॥१७॥ इत्यधिकं [illegible]
5. (ख ग घ) मन्थर ।

वकु—[सहसाऽङ्कमानीय। आकाशे] तात ! मकरकेतो !

विश्वामित्रसुतोर्वशीमुखवधू जीवातवो भूभुज—
स्ते दुष्मन्तपुरूरवप्रभृतयो यामार्त्तिमध्यापिताः।
दैवादाकलयन्नलीकललनां स्वप्नेन्द्रजाले परं
युष्मत्प्रार्थनकल्पिकः कथमयं तस्यां भवेदर्भकः ॥१८॥

आं ज्ञातम्—

कोपोपरज्यदलिकाम्बक वीतिहोत्र—
ज्वालावलीभिरवलीढवपुर्भवस्य ।
आसेदिवानविनयस्य फलं परेभ्यो
बिभ्यन्निजेषु भुजपौरुषमातनोषि ॥१९॥

किं च—

भो वासन्तिकास्तरुमरुद् भ्रमरपरभृतादयो ये केचिद् भवन्तः शृण्वन्तु, शृण्वन्तु।

पुष्पप्रकाशलतिकानवनर्मकेलि—
कोलाहलप्रभृतयो विरमन्तु धर्माः।
नप्ता जगत्त्रयपतेरिति तावदास्तां
बालोदयास्पदतयापि न पीडनीयः ॥२०॥

अथवा किमनेनारण्यरुदितेन। यावदेनं नलिनीदलेन वीजयामि [इति तथा करोति।]

अनि—[संज्ञां लब्ध्वा] सखे ! किमेवं वीजयसि ? ननु मोहमात्रमेव शरणं मदनार्त्तिमपनेतुमनिरुद्धस्य।

वकु— [निःश्वस्य] मैवमतिकातरो भूयाः।

अनि—सखे ! विचक्षणोऽसि। किमेतां निश्चेतुमर्हसि ?

वकु— सखे ! नित्यमायान्ति हि वृष्णिकटकमस्मत्पितामहदिदृक्षया सर्वज्ञा महर्षयस्तत्रैकमनुयुज्य निवेदयिष्यामि।

पुरुष—[प्रविश्य] भगवान्नारदः कुमारं दिदृक्षते।

उभौ –[ससम्भ्रममुत्तिष्ठतः।]

[ततः प्रविशति नारदः]

नारदः—विजयेतां वयस्यौ ।

उभौ— [दण्डवत्प्रणमतः ।]

नारदः— [उभावुत्थाप्योपविश्य च] उपविशतं वयस्यौ ।

उभौ— [तथा कुरुतः ।]

नारदः—[विहस्य] कथमिदानीं रहस्योपन्यासानामन्तरायाः स्म ।

अनि— चराचरान्तःकरणसाक्षिणि भगवति किमप्यस्ति रहस्यं नाम ।

वकु— शोभनमुपन्यस्तं वयस्येन ।

नारदः—[चिरं निर्वर्ण्य] वत्स ! वकुलाङ्क ! कथमयमन्यथैव ते वयस्यो लक्ष्यते ?

वकु— [स्वगतम्] अवगतमिदं तावत् भगवता । यतः—

पाणी नैव मृणालकङ्कणपदालङ्कारिणावङ्कितौ
चन्द्रोशीरपटीरपङ्करचितालेपं न वक्षोऽपि वा ।
इत्थं सम्प्रति गोपयन्नपि नवं कामोपतापोदयं
विस्पष्टक्रशिमा[1] किमेष विषमावस्थो न विज्ञायताम् ॥२१॥

अपि च –

स्खलति किमपि जल्पन्नन्तरा यद्यनल्पं
कथयति परमर्थं तत्समाधित्सयैव ।
त्यजति[2] नयननीरं यद्ययं हर्षहेतू—
नभिनयति कथं तु स्वं विवर्णं[3] पिधत्ताम् ॥२२॥

तत्कृतं भगवति वयस्यस्य वर्त्तमानावस्थान्यथा विवरणेन ।

[प्रकाशम्] यथाह भगवान् । अयं हि स्वप्नैन्द्रजालिकदर्शितां[4] कामपि युवतिमन्तर्गृहीतवान् । सम्प्रति च विषवैद्यविद्यामहिरिव कोकिलकाकली[5]-मसहमानो वज्रपातमचल इव मलयवातमभिमन्यमानो विरताहारतया विरह-शान्तये व्रतमिवाददानो विरज्यन्निव स्वजनसमाजगोष्ठ्या[6]मश्रद्दधानो दिवसान्निमील्य नयने नयति ।

1. (घ) विस्पष्टकसीमा ।
2. (खघ) यजति ।
3 (घ) विकर्णं ।
4. (खगघ) स्वप्नेन्द्रजालदर्शितां ।
5. (क) काकली शब्दो नास्ति ।
6. (क) गोष्ठी ।

किं च—

कामे कार्मुकवल्लरीं मधुकरीझङ्कारटङ्कारिता—
मादाय क्षिपतीषुसन्ततिमदो ह्यदयास्य वक्षःस्थली ।
प्रायः सायकवेधितानि कवचानीव[1] प्रिया चिन्तया
रोमाञ्चोदयदन्तुराणि विसिनी[2] पत्राणि संसेवते ॥२३॥

अपि च—

विरहमयनवीनवीतिहोत्र
स्फुरदुरुतप्तिविशुष्क पुष्करस्रक् ।
अपि नयनजलार्द्रमेव वक्षः
श्वसितशतग्लपितं तथैव धत्ते ॥२४॥

तदयं संशयितजीवितो यथा जीवति तद्भगवानेव जानाति ।

नारदः—[सविस्मयम्] कथं मन्मथपत्रिपदवीमवतीर्णो वत्सः ?

वकु— अथ किम् ।

नारदः—तत्खलु विषमं समजनि ।

वकु— अपि जानाति भगवान् स्वप्नकुटुम्बिनीं वयस्यस्य ?

नारदः—[विहस्य] वत्स ! किमित्थमधीतविद्यो वदसि ? स्वप्नविषयाणां हि निजशिरो भक्षणादीनां प्रतिभासिकी सत्तेति न व्यवहारगोचरत्वम् ।

किं च—

प्रत्यक्षवीक्षितवधूविरहोपतप्ताः
सीदन्ति नाम तरुणा यदि तत्प्रसिद्धम् ।
कः स्वप्नसृष्टिकुहकक्षणभुक्तमुक्तं
शश्वद्विचिन्त्य रमणीजनमित्थमरित ॥२५॥

तन्न युक्तमलीकचिन्तयात्मानमियदायासयितुम् ।

वकु— भगवन्नेदानीं युक्तायुक्तविवेचनं वयस्यस्य । सर्वथा भगवतो नापरमस्ति शरणम् ।

---

1. (क) प्रायः सायक वेधितानिकवया ।
   (ख) प्रायः सायकभीलितानि कवचानीव ।
2. (खगघ) विशिनी ।

नारदः—[स्वगतम्] ज्ञातैव खलु वाणकन्यका तावदस्य स्वप्नगृहीतेति ॥ तत्कृतमेताम-प्रकाश्य हृदयाशाग्रन्थिविघट्टनेन।

[प्रकाशम्] वत्स ! परिशीलयामस्तथापि । प्रत्यक्षा अपि हि गृहादयः स्वप्नेषु प्रतिभासन्ते। [इति ध्यानं नाटयन्नेत्रे मुद्रयति।]

अनि— [जनान्तिकम्] सखे ! अपि निर्द्धारयिष्यति तां भगवान्[1] ।

वकु— यथानन्तरं[2] शृणुवः ।

नारदः—[नेत्रे उन्मील्य] वत्सावद्दितौ शृणुतम्। अस्ति किमाकर्णितः शोणनगरीवास्तव्यो वाणासुरस्तावत्।

किंवा ब्रवीमि महिमानममुष्य शक्रः
स्वर्लोकचक्रमपि चिन्तयितुं बिभेति।
यत्तेन संयतिजितः शतशः स दीनो
मन्ये तदस्य शतमन्युपदं वदन्ति ॥२६॥

उभौ— यं किल[3]बाहुसहस्रनिर्जितजगत्त्रयं तातपितामहादयोऽपि श्लाघन्ते।

नारदः—तस्य चारित मदनशक्तिरिवोषेति नाम कुमारी सैव स्वप्नावतीर्णेति ।

उभौ— [ससम्भ्रमम् परस्परमवलोकयतः]

नारदः—वत्सावनुमन्येथाम्। गच्छामो वयमागमनप्रयोजनं हि वत्सयोरवलोकनमेव ।

उभौ— [उत्थाय प्रणमतः]

नारदः—स्वस्ति वत्साभ्याम्[4] [इति निष्क्रान्तः]

अनि— [निःश्वस्य] श्रुतं किल, कथं च दवीयसां ममेदृगनुबन्धो दैवेनापि निवर्त्तितः।

वकु— [विहस्य] आः सखे !

विदूरावस्थितिर्नैवानुबन्ध परिपन्थिनी ।
किमाकाशे कुमुदिनी किमम्भसि निशाकरः ॥२७॥

विधिरप्यनुरूपरचनैकस्पृहयालुरिमां वयस्यं प्रापयिष्यति।

---

1. (ख घ) निर्द्धारयति भगवान्।
2. (क) यथाऽन्तरं।
3. (ख) यं किञ्चिद्बाहु।
   (घ) यत् किञ्चिद्बाहु।
4. (ख घ) स्वस्ति युवाभ्यां।

अनि— सखे ! किमुच्यते ?

यश्चन्द्रमश्चविचकोर युवानुवन्धं
कृत्वोरगोरघटयन्मलयानिलेन ।
तस्यानुरुपरचना शतपत्रसूनोः
कुत्रापि न व्यभिचरेदिति को ब्रवीतु ॥२८॥

किं च विधिरनुकूलोऽपि विना जनोपायमुदास्ते । तद्भवानत्रोपायमवधारयतु । पश्योपायेनैव पारदपरमाणवोऽपि गुटिकायन्ते[1] ।

वकु— [चिरं विमृश्य] अस्त्यत्र साधीयानुपायः ।

अनि— कथं नाम ?

वकु— [कर्णे] निलीय बाणनगरे प्रविश्य सा उपलभ्येति[2] ।

अनि— [कर्णौ पिधाय] हन्त ! हन्त ! तदयमुपायश्चौर्ये पर्य्यवस्यत । सखे ! मा पुनरिदमुपदेष्टव्यमनिरुद्धाय ।

धिक् पाटच्चरचातुरीपरिचयान्नैवाहमद्योत्सहे
कर्तुं स्वच्छतरच्छवेः कुलगुरोर्भूयः कलङ्कोदयम् ।
किं चैतच्छलरक्षितक्षणकणावस्थायकायः कथं
तिष्ठेयं रतिरुक्मिणीरमणयोरग्रे विनम्राननः ॥२९॥

वकु— [विहस्य] रतिरुक्मिणीरमणयोरित्यनेन यदस्मार्षं तद् कथयामि तावद् वयस्यम् । सखे !—

प्रेम्णा दत्त पितामहाय भगिनीं कौमोदकीपाणये
किं रुक्मीजनकाय पुष्पधनुषे किं वा रतिं शम्बरः ।
तत्रोपायविधिस्तयोरयमभूत्किं तौ मुधा शङ्कसे
पन्थाः पैतृपितामहो हि विदुषां दोषाय नोदञ्चति[3] ॥३०॥

अनि— [सलज्जम्] सखे ! तथापि ज्वलदनलपर्य्यन्ता शोणनगरी[4] कथं[5] मादृशेन[6] सुप्रवेशा ?

---

1. (ख घ) पुटिकायन्ते ।
2. (क ग) उपलभ्येति ।
3. (ङ) वञ्चति ।
4. (ख घ) बाणनगरी ।
5. (क ख) कथं शङ्को नास्ति ।
6. (ङ) शोणनगरी मादृशेन ।

वकु— सखे ! भगवतीं ज्वालामुखीमाराध्य खेचरसिद्धिरपि तदर्थमावश्यकी ।

अनि— कथमन्यदपि साहसमादिष्टम् ।

वकु— सखे !

स्वर्गापवर्गपदवी न दवीयसी यद्
भक्तस्य नैव पुनरन्य फलोपलब्धिः ।
कष्टं मनोरथशतैर्व्यथयन्ति चेतो
ज्वालामुखीं न खलु दुर्मतयः श्रयन्ते ॥३१॥

भवतु कार्य्यनिष्पत्तौ यतेवहि ।

[इति निष्क्रान्तौ]

इति नायकविप्रलम्भो नाम तृतीयोऽङ्कः

—चतुर्थोऽङ्कः—

[ततः प्रविशति बाणः कुम्भाण्डश्च]

बाणः— [सविस्मयम्] अमात्य !

शैवालङ्कृतयो भुजङ्गपतयस्ते धर्षणीया न मे
मर्त्योऽमर्षपदी भविष्यति यदि त्रोड़ैव पीड़ाकरो।
देवं चङ्क्रमितोरचक्रमपि चातिक्रम्य निर्यातितं
पौलुमीश्वरवैरमद्यकरवै किं बाहुकण्डूयते[1] ॥१॥

कुम्भाण्डः— [स्वगतम्] इत्थमयमत्युदग्रदर्पदर्वीकरदष्टान्तः करणो न चिरेण नंदयन्ति [प्रकाशम्] देव ! विज्ञतमेषु कृतं विज्ञाप्य । तथापि प्रेष्याः प्रभुषु प्रगल्भन्ते । दर्पो हि नाम प्रभूणामस्त्रबलाविषयो वैरीति विचक्षणा[2] व्याचक्षन्ते । तदत्र देवः प्रमाणम् ।

बाणः— [विहस्य] अमात्य ! गाथामात्रमिदं तावत् । त्वमपि कथमस्मद् भुजवीर्यम-जानन्निव शङ्कसे ।

कुम्भा— देव ! शङ्कावहमन्यदप्यस्ति । सम्प्रति हि—

भवद् भुजभुजङ्गमस्मरणभीतचक्षुःश्रवः
प्रवहफणकम्पनादिव[3] मही मुहुः कम्पते ।
प्रलिम्पति च रोदसी सपदि युष्मदत्युष्मदोः
प्रदग्धपुरवेश्मनामिव समीरणो भस्मभिः ॥२॥

बाणः— कथमौत्पातिकं नाम । आस्तमकिंचित्करमिदम् । गीतश्चायमर्थोऽङ्गीरसा—

ग्रहाणां चरितं स्वप्नो निमित्तान्यौपपातिकम् ।
फलन्ति काकतालीयं तेभ्यः प्राज्ञा[4] न बिभ्यति । इति[5] ।

कुम्भा— देव ! सत्यम् । तथापि भगवतो वचनं विचिन्त्य बलीयसी मे विचिकित्सा।

बाणः— [सविमर्शम्] किं तत् ?

कुम्भा— अपि विस्मृतं नाम ? यत्किल कालभुजगलाङ्गूलेन[6] कर्णकुहरकण्डूयनमिव कुर्वता दर्पद्रढिमधौरेयमुपन्यस्य भवता भगवतोऽतिगतमुत्तरम् ।

---

1. (क) कण्डूतये ।
2. (ख घ) विचक्षणा शब्दो नास्ति ।
3. (ख घ) कम्पकादिव ।
4. (ख घ) प्रज्ञा ।
5. (ख,घ) इति पदोल्लेखो नास्ति ।
6. (खगघ) पुच्छेन ।

वाणः— [सावहित्थम्] अमात्य ! करतस्य कपालिनो वचनं प्रत्येति ?

कुम्भा— [कर्णौ स्पृष्ट्वा । स्वगतम्] इदमपरमश्रेयसो[1] निदानं यद्भगवदवज्ञा नाम ।

[प्रकाशम्] कथमित्थं भवानपि ब्रवीति ?

नापरेऽपि जगतीपतयः किं
युष्मदेकदयिता न धरित्री ।
यत्प्रसादफलमेव बलं ते
तद्गिरः कथमविश्वसनीयाः ॥३॥

वाणः— ननु तथापि प्रसाद एवास्य वैमुख्यम् । यतः—

निष्पिष्टारिघटाकिरीट[2]पटली माणिक्यरेणुच्छलो---
दश्चद्वाडवहव्यवाहविषमे संग्रामसीमाम्बुधौ ।
क्रीडन्तु क्षितिभृत्प्रमाणकरिणी शुण्डामयोर्मिगणा—
लङ्कर्माण फलायमानफलका मद्दोः फणिश्रेणयः ॥४॥

कुम्भा— देव ! मैवं वोचः । शूराणां हि साम्परायिके जयपराजययोरव्यवस्था तावत् ।

वाणः— आः किं ब्रूषे ? ममापि सहस्रबाहुशालिनो वाणस्य पराजयाशंका । अथवा

जरज्जातिसुलभोऽयमुपन्यासः । पश्य—

यद्यनीकखुरली[3]कलाविधौ
युञ्जते भुजभुजङ्गमा अमी ।
हेलयैव किमहं तदा नभो
न छिनद्मि न भिनद्मि वा महीम् ॥५॥

कुम्भा — [विहस्य] आः सहस्रं बाहव इति कोऽयमवतारो दर्पस्य ?

दोःस्थामद्रढिमाभिमाननिकषाश्मानौ महीमण्डले
नाभूतामिह किं नु हैहयदशग्रीवावुदग्रौजसौ ।
जघ्नाते अवतीर्य[4] वीर्यरभसाद् भृगुवंशमद्वंशयो-
र्देवेनैव[5] मधुद्विपा वसुमती भारायमाणाविमौ ॥६॥

---

1. (ख ग घ) ०श्रेयो ।
2. (ख घ) करीट ।
3. (घ) खुरली ।
4. (ख) स्ववतीर्य ।
(घ) ववतीर्य ।
5. (ख घ) दैवेनैव ।

वाण:— [ओष्ठं निर्दश्य[1]] आ: पाप ! जरावलीढवुद्धे ! सचिवापसद । किमिदानीमुदाहरणमर्ज्जुनदशाननौ वाणस्य ?

तत्रार्जने मनुजकीटजनौ किमास्था
रक्षः प्रधानमपि मे न समो दशास्यः।
कैलासकन्दुकसमुद्धरतोऽस्य दोष्णा—
मासीद्दशा न कियति श्रुतवानसि त्वम् ॥७॥

भवतु शिरश्छेदेन दण्डनीयोऽपि प्रवय इति क्षन्तव्यम् ।

कुम्भा — [निःश्वस्य । आकाशे] भगवन् ! चन्द्रचूड़ामणे !

नैसर्गिकानति वशीकृत वासुदेवा:
स्वर्नायक[2] प्रभृतयः सहजारयस्ते ।
वाणे च सम्प्रति विधि प्रतिकूलतायां
देव त्वयापि कथमित्थमुदासितव्यम् ॥८॥

वाण:— आ पाप ! कटुप्रलापिन्नातः परमपि क्षन्तव्यम् ।

[इति आकृष्य खड्गमुत्तिष्ठति]

[प्रविश्य सम्भ्रान्त कंचुकी]

कंचुकी —[प्रणम्य । अंजलिं बद्ध्वा]. देव ! देव ! समुच्छलितपयो रयव्यतिकरविभेदिताक्रीड़तड़ागतट विटपिकदम्बकैर्विहितप्रणामा इव सरभसविघट्टित [कवाट-] कोटि कोटरोत्कटारवमुखरित सौधकन्दरैरुदीरितस्वागता इव निविकीर्णतरुदलतृणादि संदीपितवरणवीतिहोत्र हेतिनिवहैरङ्गीकृतप्रेमपरिरम्भा इव किमिदमिति मिथः सचकितमवलोकितवदनैरुपरचितचिताभस्मभरित कनीनकानिकारनिरवकाशयनैरवरोधनितम्बिनी जनैर्गर्भागारेऽपि लब्धनिष्ठुरस्पर्शा समीरणा मध्ये चत्वरमत्याहितमातेनुः ।

वाण: — किमत्याहितम् ?

कंचुकी— त्रिदशनगरनारी हृन्निमग्नैकशल्यं

---

1. (क ग) निर्दश्य इति सर्वत्र पाठः ।
2. (क ङ) स्वर्णायक ।
(ख) स्व नायक ।

निजविजयसमज्ञा नर्त्तकी नृत्यवशः ।
किमपरमवलेप श्रीवधूतर्जनीते

[इत्यर्द्धोक्ते भयं नाटयति]

वाणः— भद्र[1] ! भूतार्थकथने कस्तवापराधः ।

कंचुकी— निपतति वत[2] भग्ना भूतले केतुयष्टिः ॥९॥

वाणः— कथं भग्नैव केतुयष्टिः [अपवार्य] भवतु[3] नायमवसरः स्थविरहिंसायाः [इति खड्गं पातयति] ।

कुम्भा— [स्वगतम्[4]] दिष्ट्या जीवातुर्मे कञ्चुकी संवृत्तः । तद्भवतु, मौनमेवातः परमवलम्ब्य दूरीश्वरादितो यावदात्मानं जीवयामि । यतो जीवन् भद्राणि पश्यति[5] । परन्तु—

श्रेयः प्रेयसि हा प्रभावहमिव प्रेष्याधमः स्वमिहा
प्राप्यैतत्करणं तदन्नशरणं यो वक्तुमाशङ्कते ।
मन्ये कल्पशतं स जीवतु ततो लब्धापशस्तैर्वरं[6]
क्ष्वेडोद्बन्ध[7]जलानलादि सपदि त्यक्तासवः साधवः ॥१०॥

तत्कथयामि तावत् । [प्रकाशम्] कञ्चुकिन् ! किमप्रमाणं वचो भगवतः खट्वाङ्गपाणेः ।

कञ्चुकी—[कर्णौ स्पृष्ट्वा] शिवशिव सम्प्रति प्रत्यक्ष एव ध्वजभङ्गे क[8] एवं ब्रवीति ।

कुम्भा— तद्विज्ञापय[9] स्वामिनम् ।

कञ्चुकी—किं विज्ञापनीयमपि[10] ? स्वयमेव स्वामी वा नानुसन्धत्ते ।

कुम्भा— नानुसंधत्त एव ।

वाणः— भद्र ! तवापि स्थविरवत् कोऽयं व्यामोहः ।

निर्व्यूढ्रढिमा त्रिपिष्टपसदां यो वैरनिर्यातने
जीर्य्यत्केतन भङ्गभीत इति किं वाणोऽयमुन्नीयते ।

---

1. (ख घ) भद्र शब्दो नास्ति ।
2. (खगघ) तव ।
3. (घ) भवतु इत्युल्लेखो नास्ति ।
4. (घ) स्वगतमित्युल्लेखो नास्ति ।
5. (क) 'इति' अधिकलेखोऽस्ति ।
6. (ग) लब्धापशस्तैर्वरं ।
(कखघ) लब्धापशस्तैवारं ।
7. (ख घ) क्ष्वेडोद्बन्ध्य ।
8. (घ) न ।
9. (ख घ) विज्ञापय ।
10. (ख घ) विज्ञापनीयमस्ति ।
(ख घ) विज्ञपयामि ।

नैवाभज्यत कोऽपि तावदियतास्माकं भुजानोकह—
स्तेजो नापि न वाहिनी न च मनःस्थेमा न वा साहसम् ॥११॥

कञ्चुकी—कः सन्देहः ।

वाणः— तद्गच्छ । विप्रानुत्पातशान्तये यावदावेदयितुम् ।

कञ्चुकी—अयमप्रधानं पक्षः ।

वाणः— किं पुनः प्रधानम् ?

कुम्भा— किमन्यदीश्वरप्रसादनात्[1] ?

वाणः— कथमपृष्ट एवायमुत्तरयति मध्ये स्थविरः ।

कञ्चुकी—देव ! न्याय्यमिति ।

वाणः— [सकोपम्] जाल्मयुवामेव केवलं न्याय्यमनुवर्त्तेथे ।

कंचुकी— [अंजलिं बद्ध्वा] देव ! देव्यापीदमादिष्टम् । यथा देवेनोत्पातशान्तये भगवत्प्रसादनं कर्त्तव्यमिति ।

मकरिका—[प्रविश्य[2]] इअं सा पिअंवदा देइ महाराअं अवेक्खिदुं आच्छदि ।
(इयं सा प्रियम्वदा देवी राजानमवेक्षितुमागच्छति) ।

[सर्वे ससम्भ्रममवलोकयन्ति । ततः प्रविशति प्रियम्वदा]

कुम्भा—भद्र ! कंचुकिन् ! यावदादौ भगवत्प्रसादनार्थमावामेव साधयावः ।
[इति निष्क्रान्तौ] ।

वाणः— प्रिये ! प्रियम्वदे ! किमिति[3]त्वरयैवागतासि ?

वित्रस्यन्ताविव मधुकरौ लोचने केशपाशो
भ्रश्यद्दामा कुसुमधनुषश्चामरौपम्य[4]मेति ।
श्वासैर्नासामणिरपि नरीनर्त्त्यते[5] सर्वथा ते
गत्यायासो नवनिधुवनक्रीड़या तुल्यमासीत् ॥१२॥

तन्न खलु किंचिदत्याहितमवरोधे ।

प्रियम्वदा—अज्जउत्त किंअण्णम् । किं क्खु ण सुणिअदि झभ भङ्गवुत्तन्तो ?
(आर्य्यपुत्र ! किमन्यत् । किं खलु न श्रूयते ध्वजभङ्गवृत्तान्तः ?

1. (ग घ) ०प्रसादबलात् ।
2. (ख घ) छाया इत्यधिकपाठोऽस्ति ।
3. (ख घ) किमिति ।
4. (ख घ) चामरौदम्यमेति ।
5. (घ) नरीनृत्यते ।

वाणः— प्रियेऽश्रौपमिदानीमेव कञ्चुकिनः । किं ततः ?

प्रिय— अज्जउत्त ! तदो भअं तक्केमि ।
(आर्य्यपुत्र ! ततो भयं तर्कयामि ।)

वाणः— [विहस्य] अयि प्रियम्वदे !

कस्ते भीतिलवोऽपि केलिकलहे भर्तुर्भवानीभुवा
श्लाघन्ते विजयाजयाप्रभृतयो यद्वीरपत्नीव्रतम् ।

[हस्ते हस्तं निविष्य]

त्वं संरूढ़ नवोत्पवैर्विपुलयन् गीर्वाणगोगर्भिणी
वाणो न प्रतीयेत्त्रिपिष्टपसदां किं पिष्टपेषं रणे ॥१३॥

मक— महाराअ ! जदि वि एवं विधा तधा विअ हेतुउ झअभङ्गो त्ति ट्ठाणं क्खु संकाए ।

(महाराज ! यद्यप्येवं तथाप्यहेतुको ध्वजभङ्ग इति स्थानं खलु शङ्कायाः)

वाणः—आः सरले ! कृतमेतत्प्रसङ्गेन । कथय किमिदानीमन्यथैव लक्ष्यते विरलभूषणा ते प्रियसखी ।

मक— [प्रियम्वदामालोकयति ।]

वाणः --प्रियम्वदे !

अयेऽयं किमपाङ्गवीक्षणसखी न भ्रूलता स्पन्दते
बाहू विस्मरतोऽथवा कथमिव स्वैरं ग्रहानुग्रहम् ।
दासोऽयं सहसा प्रसादयति यत्किंचित्प्रिये क्षम्यतां
स्थानेऽलीक विशङ्कया युवतयोऽसूयन्ति यत्प्रेयसे ॥१४॥

प्रियं— [मकरिकां संज्ञापयति]

मक— महाराअ ! अप्पडिवण्णवत्तणिअमा देइ ।
(महाराज ! प्रतिपन्नव्रतनियमा देवी ।)

वाणः—[सविस्मयम्] कदा पुनरयमारब्धो व्रतनियमः ।

प्रिय— जदा अज्ज उत्तेण देवस्स समुहे किम्पि दप्पेण अणजुत्तम् ।
(यदार्य्यपुत्रेणदेवस्य सम्मुखे किमपि दर्पेणानुयुक्तम् ।)

बाणः—[विहस्य] प्रिये !

दृष्टी[1]निरञ्जनरुचौ न कुचौ भजेते
पत्त्रावलीरधरयोरनलक्तता च ।
दासे निरागसि विशङ्क्य विधीयमानो
मानो ह्रिया व्रतमिति व्यपदिश्यते किम् ।।१५।।

भवतु कियानवधिरस्य नियमस्य ?

प्रियं—[सलज्जमिव] मासावसाणं जाव । (मासावसानं यावत् ।)

बाणः—[सासूयमिव] किमति[2]साहसं नाम ।

परं कमलिनी रुचामिह सहिष्णुरुष्णत्विषो
विषोढुमियमप्यलं न खलु ता लुलन्ती तपे[3] ।
अजस्रपरितापिनो कथमियं व्रतप्रक्रिया
शिरीषदलकोमलैरवयवैस्तव क्षम्यताम् ।।१६।।

अपि च—

सोढुं सर्वमपि क्षमेत भवती लोलाक्षि वक्षोजयोः
कार्कश्यादवधारयामि हृदयं वामभ्रुवां कर्कशम् ।
बाणो हन्त मुखारविन्दसुषमां पश्यन्नसावग्रतः
प्रेयस्या रजनीरथाङ्गसदृशावस्थः कथं वर्त्तताम् ।।१७।।

अपि च—

ते त्वन्ये तरुणा रसालतरुणा सङ्गो न तन्नेत्रयो—
र्नेदीयानपि कोऽपि कूजति पिकस्तत्कर्णयोर्मन्महे ।
येषामेकतमोऽपि याति दिवसो वासन्तिकः प्रेयसी
वक्त्रेन्दुं मकरध्वजागमकथाऽनध्यायतां ध्यायताम् ।।१८।।

तत्कृतमवैतद्व्रतमिदानीं विरम दुर्व्यसनात् ! [इत्यालिङ्गितुमिच्छति ।]

प्रियं—[किञ्चिदपसरन्त्येव निवारयति ।]

---

1. (क ग) दृष्टि ।
2. (ख ग घ) किमति ।
3. (घ) पगे ।

मक— [स्वगतम्] हन्त जादो णिअमभंगो पिअ सहिए। [प्रकाशम्] सहि किं णिवारेसि णं जाणासि पडिव्वदाणं पदि हिअआनुवट्टणं पढमो धम्मो त्ति।
(हन्त जातो नियमभङ्गः प्रियसख्याः। सखि! किं निवारयसि ननु जानासि पतिव्रतानां पतिहृदयानुवर्त्तनं प्रथमो धर्म इति।)

प्रियं—सहि मअरिए! अज्जउत्तस्स एवं मणसि पविसिअ कधेन्दि किं ण लज्जेसि।
(सखि मकरिके! आर्य्यपुत्रस्यैवं मनसि प्रविश्य कथयन्ती किं[1] न लज्जसे।)

बाणः—प्रिये! सत्यमाह मकरिका [इति बलादालिङ्गनं निवेशयति।]

प्रिय— [संस्कृतमाश्रित्य] आर्य्यपुत्र!

आस्तां केतनभङ्गवद्व्रतविधेर्भङ्गोऽप्यनर्थावहः
खिन्नं किं न ततो मनः पुनरिदं मन्ये महद्दुःसहम्।
प्रत्यक्षं हि भवानधीरतरधीर्निश्रद्धधीरन्तिमाः
स्मेरस्मेरमुखेन्दुगर्भितगिरः सख्यो वदिष्यन्ति माम्॥१९॥

बाणः—[सावहासम्] आः किमिदमुपन्यस्तं केतनभङ्गवदिति। कथमिदानीमपि स एव सम्भ्रमस्तवानुवर्त्तते।

प्रियं—अज्जउत्त! भोदु जधा तधा सव्वधा दे भअवन्त पसादणं जुज्जइ त्ति भणामि।
(आर्य्यपुत्र! भवतु यथा तथा सर्वथा ते भगवत्प्रसादनं युज्यत इति मन्ये।

बाणः—[स्वगतम्] भवतु, वाचा स्वीकृते को विरोधः। [प्रकाशम्] प्रिये एवमिदं। विधास्यामि।

प्रियं—ता किं विलम्बीअदि? (तत्किं विलम्ब्यते?)

बाणः—[ऊर्ध्वमवलोक्य] नेदानीमवसर पदमात्रमपि गन्तुम्। पश्य—अयमष्टकुलाचल-सानुसूर्य्यकान्त कुट्टिमकपोटयोनि द्विगुणकिरणावस्कन्दविलुलित पत्रावली वनालीकषण्डनिलीयमानमधुकरनिकुरम्बकैतवतिमिराणि निराचिकीर्षुरिव प्रतिबिम्बदम्भतः प्रतिपन्नाकरतरङ्गलेखा ताण्डवितमण्डलो मयूखमाली वियदन्त रालमालम्बते।

---

1. (ख घ) किमिति लेखो नास्ति।

[नेपथ्ये वैतालिकः]

मार्त्तण्डज्योतिरुज्जृम्भितनिविडरविग्रावशुष्मान्तरुष्म[1]—
क्रीडावल्मीक निर्य्यन्निजनिजभुजगी भोगभारोपरिष्ठात् ।
सम्प्रत्याशीविषौघाः प्रतिगिरिगुरु निःश्वस्य निःश्वस्य पीवद्—
ग्रीवादण्डैरखण्डैर्वितत पृथुफणानातपत्राणयन्ति ॥२०॥

अपि च—

काष्ठाद्राघिष्ठमौहूर्त्तिकविकटघटाघण्टिकाघोषनिद्रा
गर्भस्रावव्यथावस्थितमिव गुरुद्दग्द्वन्द्वमस्पन्दयन्तः ।
पाथो यन्त्रच्छटाम्रेडित जडवडभीक्रोडमध्यास्य गाढ़—
क्रीडाभङ्गी समग्र क्षपितरजनयः शेरते राजदाराः ॥२१॥

अपि च—

सासूयाप्युत्तरीयव्यजननिधुवनाविर्भवद्बाहुवल्ली
शैथिल्यस्यानुकम्प्य स्मितमधुरमुखी दर्शयन्ती प्रसादम् ।
आधत्ते वल्लभस्योरसि रसिकवधूः स्वेदसम्भेददम्भा—
दम्भो निष्यन्दरम्यावुरसिजकलशौ तन्नखोल्लेखरन्ध्रौ ॥२२॥

अपि च—

सद्यः सम्भ्रमलब्ध कर्णपटली हल्लीषक[2]प्रक्रिया
सध्रीचीनकरौघ[3]शीकरभरी शान्तोग्रसन्तप्तयः[4] ।
आक्रम्यापि निमीलदर्द्धनयनाः स्तम्बेरमग्रामणी
गण्डाग्रेषु नखैर्नखण्डनमनः कण्ठीरवाः कुर्वते ॥२३॥

अपि च—

मरकतमयदण्डाः श्रेणयश्चामराणा—
मुपरि भरितशुण्डा शीकरोत्सेकदम्भात् ।

1. (क) शुष्मानुरुष्म ।
2. (क ङ) सर्वत्र हल्लीशक इति लेखोऽस्ति ।
"मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकं तु तत्" । हेम ।
3. (क) करोघ ।
(ङ) सधीचीनकराग्र ।
4. (क) शान्तोपसन्तप्तयः ।

करिभिरभिनिषण्णामिन्दिरां पद्मसद्म—
न्युपचरितुमिवाम्भो मध्यमग्नैर्ध्रियन्ते ॥२४॥

वाणः—[आकर्ण्य] साधुरे वैतालिकावतंस साधु, यदवसरोपयुक्तमुपन्यस्यति[1] ।

मक— सहि सच्चं दाणिं दुप्पेच्छणीओ मण्डलो भअवं सहस्सधरणो तासंगृसमअं जावअणुवालेम्म ।

(सखि ! सत्यमिदानीं दुष्प्रेक्षणीय मण्डलो भगवान् सहस्रकिरणस्तत्सन्ध्या-समयं यावदनुपालयामः ।)

वाणः—[सर्वतोऽवलोक्य] प्रिये ! सम्वर्त्तविवर्त्तोऽयं समयः । सम्प्रति हि—

आतपत्रायमाणानां सरस्यम्बुरुहामधः ।
स्थाने शैवलशय्यायां राजहंसो निषीदति ॥२५॥

अपि च—

तृषामृषापो विरचय्य धावयन्
वृथैणयूथानि कथं न ह्रीयताम् ।
भवेन्न मार्त्तण्डमयूख चण्डिमा
रथाङ्गनाम द्विज कामदो यदि ॥२६॥

प्रियं— [जनान्तिकम्] सहि मअरिए एइदोविअच्छरीअं पेक्ख सो एसोणिज पिच्छ-च्छया णिवारितातवो मे किरिड़ामउरीं सम्भावेदि ।
(सखि ! मकरिके इतोऽप्याश्चर्यं पश्य, स एष निजपिच्छच्छाया निवारितातपो मे क्रीड़ामयूरोमयूरीं सम्भावयति ।)

वाणः—[स्वगतम्] दिष्ट्या प्रसीदन्तीव प्रिया किमपि ब्रवीति । तत्पुनरन्येनामन्यतो विनोदयिष्यामि । [विहस्य । प्रकाशम्] प्रिये !

व्यर्थं वेद्मि गतागता निरचयन्नाचक्रवालाचला—
द्देवो वेदमयस्त्विषां पतिरयं जागर्त्ति नक्तं दिवम् ।
अध्वन्याहि मरीचिसञ्चयपरीरम्भाप्त धर्माम्भस—
श्छायायामधिरस्य सम्यगधुना संज्ञामुरी कुर्वते ॥२७॥

---

1. (क ग) ॰मुपन्यस्यसि ।

अपि च—

प्रौढज्वालनिजोपलानलपरिष्वङ्गप्रसङ्गादमी
दह्यन्ते सहसा सहस्रमसकृत्पादाः पतङ्गस्य किम् ।
एतेनानिभृतोर्मिनर्मरचना भूमभ्रमि कैतवा—
दम्भसम्भरितानु विम्बवपुषा यच्चट्पटो भूयते ॥२८॥

तदनेनैव छायाध्वना विहारमण्डपं गच्छामः ।

[इति निष्क्रान्ताः सर्वे ।]

इति ध्वजभङ्गो नाम चतुर्थोऽङ्कः

—पञ्चमोऽङ्कः—

[ततः प्रविशत्याकाशयानेन भृङ्गी]

भृङ्गी—अयमहं भगवत्या पार्वत्या ज्वालामुखीमनुप्रेषितो बाणनगरादागच्छामि । विदितं च भगवत्यानिरुद्धो वत्सामुषामभिलष्य[1]भवनीमागदुर्गम शोणपुरी प्रवेशाय खेचरसिद्ध्यै ज्वालामुखीमाराधयितुमिच्छतीति । आदिष्टमिदं च यथा—ज्वालामुखि ! खेचरसिद्धिरनिरुद्धस्य विलम्बेन सम्पादनीयेति ।

[परिक्रम्यावलोक्य च] प्रथमप्रस्थानरभसेन कियद्दूर्वमतिक्रान्तम् । तथाहि—

वन्ध्यत्रिकूटमलयाद्रिमहीधराणा—
माविर्भवत्युपलकन्दुकबन्धुतेयम् ।
एताश्च सिद्धसरितः परितः क्रशियो
नालीकनीलसुषमां भृशमाश्रयन्ते ॥१॥

अपि च—

छायाकरस्य कलयामि तलप्रदेशो—
दञ्चद्भुजङ्गमघटाङ्कि जटासमग्रैः ।
आवालवद्वलयितं विलसत्पयोधि —
भूगोलमस्य कनकाद्रिसम[2] द्रुमस्य ॥२॥

किंचात्यन्तमुपरिवर्त्तमानस्य ज्वालामुखीपीठ[3]परिचयो मा[4]भूयात्तद्यावदितोऽधः किंचिदवतरामि । [इति तथा कुर्वन् सविस्मयम्]

एते सद्यो विभक्ता इव जलनिधयो निम्नमन्तीव पृथ्वी
कायव्यूहं गुहाः कुर्वत इव विटपिश्रेणीरुत्तिष्ठतीव ।
आक्रामन्तीव तीराण्युपरचितरयाः संचयान्निम्नगाना—
मुर्वीगर्भादिवैते दिशि दिशि गिरयस्तावदाविर्भवन्ति ॥३॥

---

1. (ख घ) ०मभिलष्यन्न ।
2. (क ख) कनकाद्रिमय ।
3. (क ग) न ज्वालामुखीपीठ ।
4. (ख घ) मा इति लेखो नास्ति ।

तदिहैव दिशोऽवधारयिष्यामि । [तिर्यगवलोक्य । सानन्दम्]

दिष्ट्येदं लवणोदरोधसि मिथः संघट्टितोर्मिच्छटा –
वेगोत्कूलित शङ्खवद्भगवतः क्षेत्रं पुरो दृश्यते ।
यत्रायं सहवासि सिद्ध शबरी विश्रम्भसम्भावितो
देवो नीलवसुन्धराधरदरी कण्ठीरवः क्रीडति ॥४॥

अपि च—

पितरमितरवन्न यत्प्रियाया
जलधिमयं सविधे जहाति जातु ।
अहह मधुरिपोरपि त्रपायै
तदिदमुदञ्चति दारपारवश्यम् ॥५॥

[विचिन्त्य] साधीयानयमुत्कलो देशः । अत्र हि—

पद्मापतेरयमुदञ्चति नीलशैलः
सस्वर्णकूटशिखरी च मृगाङ्कमौलेः ।
मध्ये विवर्त्तित दुकूलित[1] मौक्तलक्ष्मी
वक्षोजयोरिव ययोर्भृगुनिम्नगेयम् ॥६॥

[अग्रतो गत्वा] तदेतद्विरजक्षेत्रम् । अत्र च विरजा नाम विश्ववन्द्या भगवती । [विचिन्त्य] देवि !

प्रायोऽकामयत प्रजापतिरपि स्वापत्यमत्याहिते—
हेतुं तत्र रजः प्रजल्पति[2]जनः कीर्त्यै च तद्वर्जनम् ।
ब्रह्मोपासिन ते रजो न च तमः सत्त्वं न वा तत्त्वतो[3]
वेदान्ता ब्रुवते विशिष्य विरजा नाम्ना यदाम्नायसे ॥७॥

[अन्यतोऽवलोक्य] अयं च वङ्गाभिधानो जनपदः ।

---

1. (क ग) दुकूलति ।
2. (ख घ) प्रकल्पति ।
3. (घ) तारणे ।

तोयक्रीड़ावदन्नीड़ित यवनवधूद्गीर्ण गण्डूपगर्भो—
दञ्चन्मैरेययोगादिव विवशतमा क्वापि मन्दं स्खलन्ती।
अक्ष्णोर्भागीरथी मे प्रतिपदमतिथि: प्रौढगौड़ेन्द्रगाथा
यथातथ्योपगीतिद्रवणकविगणग्रस्तकूलेयमास्ते ॥८॥

[परिक्रम्य] कथममी समीक्ष्यन्ते कीकटाविषया:[1]।

यत्रोपनीतयवपिण्डपिचिण्डपूर्त—
नि:शङ्करङ्क जनसङ्कटकूलभूमि:।
विस्पष्टविष्णुपदचुम्बिरया गयायां
फल्गु नदी वहति विष्णुपदीर्ष्ययेव ॥९॥

इदं च पंचवाणवैरिणो देवस्य वाराणसी नाम नित्यायतनम्।

गोष्ठीनेदिष्ठवृन्दारकगुरुपुरतोऽधिष्ठिता यत्र मा—
न्मुक्तौ युक्ति प्रपश्चानहमहमिकया योजयन्तो[2]जयन्त:।
कुर्वन्त्यासन्नमाखण्डलमुखमखभुङ्मण्डलं पण्डितानां[3]
वर्गा: स्वर्गादिकामश्रुतिकृतकुतुकाक्षेपच्छिन्नावलेपम् ॥१०॥

[किञ्चिदुपसृत्य[4]] एतच्च मस्तकरत्नं समस्ततीर्थानां प्रयागो नाम। [सस्मितम्]

सपत्न्योरन्योन्यं[5] तपनतनया जह्नुजनुषो
परिष्वङ्गो विस्माययति न तथा तत्खलु यथा।
अधो यन्मग्नानां[6] पयसि दिवमभ्युत्पतनव[7]—
न्मृतानामप्यत्र श्रुतिरमृतभूय:[8] कथयति ॥११॥

इतश्च निर्गत्य यावदयोध्यारथ्ययैव साधयामि। [इति परिक्रम्य] इयमयोध्यानगरी।

---

1. (ख ग) कीटा विषया:।

टीप्पणी—(१) कीकट विषय: = चरणाद्रि समारभ्य गृध्रकूटान्तकं यावत् कीकट-देश: मगध नाम्ना परिचित:। तदधुना विहार इति ख्यात:।

(२) की+कट+अच् इत्यस्मात् कीकट: सिद्ध:। कीकट: = कृपण:।

2. (ख घ) यो नयन्तो।
3. (ख घ) पिण्डितानां।
4. (ख घ) किञ्चिदपसृत्य
5. (कखघ) सर्वत्र अन्योऽन्यं।
6. (घ) यन्नग्नानां।
7. (ख घ) ०मभ्युत्पति।
8. (क ङ) भूयं।

चलदिन्द्रशुक[1] निकुरम्बसोदरै—
र्यदगारि तारतरकेतनाञ्चलैः ।
अपराधलेशरहितोऽपि काश्यपि—
र्गरुडे यवीयसिरुषेव ताड्यते ॥१२॥

[विलोक्य । ससम्भ्रमम्] कतमा पुनरियमटवीतिमिराद्वैतमग्रे मार्गमातनोति ।
[विचिन्त्य]

एतत्संस्थानमानन्दितमुनियमुनातीरनग्नं भविष्णु—
क्रीडामग्नव्रजस्त्रीगणकृपणवचः साक्षि वृन्दावनस्य ।
यस्मिन्वैरायमाणे मघवति भगवद्बाहुदण्डावलम्बी
ग्रावा गोवर्द्धनोऽयं चिरमतनि गवामातपत्रं गरीयः ॥१३॥

[विमृश्य] कथमचिरेणैव कियानतिक्रान्तः पन्थाः । तदिदानीं नेदीयः प्रायमेव ज्वालामुखी पीठम् । यतः—

सेनासत्वरगत्वरेभचरणावष्टम्भसम्भ्रान्तिम—
न्न्यञ्चत्कुण्डली मण्डलेश्वरशिरः सन्दोहकम्पाकुला ।
एषामर्षणरौहिणेय धरणी सीरार्पणो[2]पक्रमा—
दद्यापि द्विपसाह्वया[3] कुरुपुरी घूर्णावतीवेद्यते ॥१४॥

[ससम्भ्रमम्] कथममी लंघिता एव कुरुजाङ्गलप्रदेशाः । प्राप्तं च ज्वालामुखी-पीठम् । [चिरं निरूप्य]

कथं सोऽयमनिरुद्धोऽपि देवीमण्डपनेदीयानेव । [विचिन्त्य] कष्टमयमतीव मकरकेतुकदर्थितो वर्त्तते । यतः—

अद्यायमङ्गपरिपाण्डिम भस्मभूम—
निःश्वासधूमविनिवेदित मन्मथाग्निः ।
कण्ठावसक्तमृदुलार्द्र[4] मृणालनाल-
कीनाशपाशवलयः प्रलयं प्रयाति ॥१५॥

---

1. (क) चलदन्द शूक ।
(ख) चलदिन्द्र शूक ।
(ग) चलदन शूक ।
(ङ) चलदम्य शूक ।

2. (कखग) शीरार्पणो ।
3. (घ) द्विषसा हिया ।
4. (क ङ) मृदूलाद्रि ।
(ख घ) मृदुलाद्रि ।

अपि च—

व्रजन् क्वापि क्वापि स्खलति पदवीमन्ध इव ना—
नुसंधत्ते पश्यन्नपि विटपि संघट्टितवपुः ।
न हि ध्यानादन्तः स्फुरदभिमत व्यक्तिकतया
वियोगी योगी वा बहिरपि तदन्यत्कथयति ॥१६॥

भवतु किमनेन ? अहमन्तर्हित एव भगवत्याज्ञां यावद्देव्यै निवेदयामि ।
[इति निष्क्रान्तः]

[ततः प्रविशत्यनिरुद्धः]

अनि---[विलोक्य] तदेतत्पीठम् ।

ज्वालामुखीं भगवतीमधुना प्रसाद्य
यत्रोपलभ्य च विहायसि यानसिद्धम् ।
गत्वा ज्वलज्ज्वलन दुर्गमभीमसीमां
वाणासुरस्य नगरीमुषया[1]भिरंस्ये ॥१७॥

अपि नामैवं भवेत् । अथवा कृतं सन्देहेन । ज्वालामुखीमुपासितानां हि नाणिमाद्यष्टसिद्धयोऽपि दवीयस्यः खेचरसिद्धिस्तु कतमा ।

[किञ्चिदुपसृत्य] अहो वीभत्समितः[2] ।

एते मण्डपचत्वरस्य पुरतः स्वः साधकग्रामणी
सायं वल्युपहारमेषमहिषच्छागोत्तमाङ्गोत्कराः ।
स्वेषामर्द्धनिशिथिनी विहरणोदश्वत्पिशाचीगण-
क्रीड़ाकन्दुकतां परस्परपरिक्षुण्णाः स्फुटी कुर्वते ॥१८॥

[परिवृत्य] कथमितोऽपि कौतूहलम् ।

विस्मेरैरनुपाकृतोऽपि स जवाग्रैवेयकः साधकै—
र्वल्युपर्णायु[3]रुदीर्णदृक् स्वयमसृक्स्यन्दीव संदृश्यते ।
किं चोप्ताहुतयः समापितपुरश्चर्य्या सपर्या इमे
वह्नावह्निविहुताःसवसपीत्यश्नन्ति शेषं हविः ॥१९।

1. (क ख) नगरीमधुना ।
2. (ग) पुस्तकस्य पाठ्यं समाप्तम् ।
3. (ख घ) वर्ल्युपर्णायु ।

तदहमिहैवाद्य कुहूरजनीमपनेष्यामि ।

[प्रतीचीमालोक्य] कथमियमवतीर्णेव चरमसन्ध्या । सम्प्रति हि भगवानम्बरमणिरस्ताचलमस्तकाटवीकण्टक[1] विटपिविघटनादिव च्छिद्दुरजजिरांशुको लक्ष्यते ।

[विचिन्त्य । सशिरः कम्पम्]

क्वथितमिदमनेहो लोहकारेण शोण-
च्छविरवि कपटा यः पिण्डमेतर्हि मन्ये ।
अधिजलधिपुरस्थो[2] यन्निरस्तं तदावि—
र्भवति तिमिरदम्भादम्भसो धूमसंघः ॥२०॥

अपि च—

विच्छेदोच्छ्रित शोककोकरमणी सन्देह काकूक्तिभिः
क्रन्दन्तीव कलिन्दशैलतनया शङ्के तमः कैतवात्[3] ।
क्वापि प्रापितमस्ततां विधिवशेनोष्णत्विषं विश्वतो
वर्त्तिष्णुर्निविडोडुवुद्बुदवती स्वं तातमन्विष्यति ॥२१॥

[सर्वतो निर्वर्ण्य]

स्पष्टोडुस्फटिकाक्षदामसुषमा सेयं पुरश्चर्य्यं यै—
राविर्भावितपङ्कजाक्षिमुकुलावस्था कुहू शर्वरी ।
विश्वेवाविषयाघटप्रभृतयो नेत्राणि वा प्राणिनां
विद्यासिद्धिवलेन नूनमनयानीयन्त सद्यो लयम् ॥२२॥

[विचिन्त्य । सस्मितम्]

प्रागेव भवदामया विजनता जीवातुरस्तो रवि—
र्नोदञ्चत्यमृतौषधी परिकर स्फीतश्च शीतच्छविः ।
अन्धोऽसाविति साम्प्रतं कविकुलोत्प्रेक्षा मया दामया
लक्ष्मीनायकमिन्दुमित्रनयनं कस्तावदुल्लाघयेत् ॥२३॥

---

1. (क) कण्ठक ।
2. (ख ङ) जलधिनभस्तो ।
3. (ङ) कैतव ।

[ऊर्ध्वमवलोक्य] कथमचिरेणैव प्रौढ़प्राया तमिश्रेयम् । यतः श्मशानवेश्मोदरविहर-दुल्कामुखवदनवैश्वानर-निवहवह्लोत्तुङ्गस्फुलिङ्गप्राय- ज्योतिरिङ्गणग्रहणकुतूहलवलमान पिशाचनितम्बिनीनिकुरम्बकं सायं ताण्डवितचण्डीरमणचरणावष्टम्भ-विचलित-मेदिनीवलयविसृत्वराम्बुराशितिमिरच्छटाकपटवीचिनिचयोन्मुक्तशङ्खशुक्तिनिकराय-माणनक्षत्रगणं भुवनमिदानीमभूतचरवदास्ते । [विमृश्य] यत्सत्यमविज्ञेयमहिमानः पितृवरणाः

अपि दीपलोपमसहन्तभीरवो
रति-मन्दिरे सहचरीकृतं न याः
बहिरीदृशान्धतमसेऽपि ता वधू-
रभिसारयन्ति हि विशङ्कमेवते ॥२४॥

तदेतत्साधीयः संपन्नम् । यदविलम्बसिद्धयोऽन्धकारत्रियामा इति तन्त्रकारा मन्त्रयन्ते ।

[उपसृत्य] सैषा ज्वालामुखी देवी । [अञ्जलिं बद्ध्वा] भगवति[1] !

रणारम्भसम्भ्रान्तशूलाग्रलग्ना-
तपत्रायमाण क्षपानायकायै ।
त्रिपिष्टप्यपर्याप्तदोर्दण्डषण्ड-[2]
प्रचण्डायुधायै नमस्ते नमस्ते ॥२५॥

अपि च—

जय विरचितेन्द्रादिवादित्रभङ्गीरवारम्भसङ्गीभवद्वैरिवक्षः[3]
कबन्धच्छटानर्मसम्बन्ध सद्यो लसन्नाम्यखट्वाङ्गपाणिप्रणुतं[4]
द्विपत्वग्वितानोदिताम्भोदशङ्का नटत्तारकारातिकेलिप्रवेक-
मतिविवृतवक्त्रावटद्वारजीवत्प्रविष्टा शर[5]श्रेणीसंबाधकाली-
पिचिण्डप्रचण्डोच्चरद्भूरि भीमानवच्छिन्नहंकारवित्रास्यमानं
द्रवद्देवतावस्तुविभ्रंशवीदयाहसत्प्रेतवेतालकन्याकदम्बं
सरभसपदन्यासभाराभिभूताष्टदिग्दन्तसन्त्रासनिर्घोषरोष-
स्फुरत्केशरिस्थूललाङ्गूललेखापरावर्त्तमाशश्वमार्त्तण्डयानं

1. (ख) भगवति इत्युल्लेखो नास्ति ।
2. (ख) षण्ड इत्युल्लेखो नास्ति ।
3. (क) रक्षः ।
4. (क ख) प्रणुत्त ।। प्रणुतं = प्र + णु + क्त = स्तुतम ।
5. (ख) सर ।

स्फुटावर्त्तवद्धासरव्यासलाभ प्रहृष्यत्तमव्योमगङ्गारथाङ्गं
वन्दे तं देवमोदप्रदमसमसमित्ताण्डवाडम्बरं वः ।

अपि च—

वक्त्रं ते निजनिःसृतामृतभरीम्लायत्तृतीयेक्षणो-
दञ्चद्धूमकलङ्कसङ्करकृताश्चर्येन्दुलेखासखम् ।
पूजान्तर्विबुधाभिघारितसुधःसेंकुर्वदर्च्चिर्मयं
सद्यो जातवितीर्णकल्पलतिकाकर्णावतंसं भजे ॥२६॥

अपि च—

मध्ये मध्ये मदश्रीस्खलदलसपदादेशलेशोपसीद—
द्गीर्वाणग्रामणीभिर्विरचितमदिरापूरणो भाजनेषु ।
युद्धक्रीडावसाने रजनिचरवसामज्जमांसोपदंश—
श्चामुण्डानारसिंही प्रभृतिभिरवतात्पानगोष्ठीरसस्ते ॥२७॥

[प्रणम्य । साशंसम्]

भगवति !
भूवर्त्मागम्यनगरी गर्भगूढनितम्बिनीम् ।
साहसी लिप्सुरायातो विद्धि खेचरसिद्धये ॥२८॥

[सानन्दम्] कथमखण्डमण्डपदरी प्रतिरवकैतवात्प्रतिश्रुतमेवेदं भगवत्या । तदेतदग्रद्वारमवरुद्ध्य जपं यावदनुतिष्ठामि । [इति नाट्येन तथा करोति ।]

[प्रविश्य सम्भ्रान्ता पूजोपहारपाणिर्नारी]

नारी—पुलिस पुलिस उच्चिट्ठ उच्चिट्ठ ।
(पुरुष ! पुरुष ! उत्तिष्ठोत्तिष्ठ ।)

अनि—[श्रुत्वा । अपेन चक्षुषी निमीलयन्नेव । स्वगतम्] आः कतमोऽयं मूलमन्त्रस्य व्यत्ययस्य[1] कियदक्षराणि द्विराचष्टे ।

नारी—पुलिस जाव ण अदिक्कमदि पूजासमए देइए दावप्पडिहारं प्पडिच्छ ।
(पुरुष यावन्नातिक्रामति पूजासमयो देव्यास्तावत्प्रतीहारं प्रतियच्छ ।)

अनि—कथं[2] स्त्रीवचनमिवाभासते । तदिदानीमसौ विशेषतो न सम्भाषणीयैव[3] ।

---

1. (क) व्यत्यस्य ।
2. (ग) कथमित्युल्लेखो नास्ति ।
3. (ख ग) सम्भाषणीयेति ।
4. (ख) सोमन्तलेखा

नारी—अणज्ज वहिरेणव्व ण सुणीअदि णम्पि मूएणव्व उत्थरं पड्विज्जसि । अकोसि तुमम् ।

(अनार्य्ये ! वधिरेणेव न श्रूयते नापि मूकेनेवोत्तरं प्रतिपद्यते । तत्कोऽसि त्वम् ?)

अनि—हन्त ! कुपितेवेयं तावदनुनयामि । [इति नेत्रे उन्मील्य] अये ! किमिदम् ? इयं हि—

सिन्दूरच्छुरितान्तरालकवरी सीमन्तरेखा[4]मिषो—

दञ्चद्दीपशिखावखण्डिततमश्चेतो ममातन्वती ।

हेमद्माधरसोदरस्तनभरक्लिष्टाङ्गयष्टिर्वधूः

सृष्टिः कापि विधातुरम्बुजसखी पीयूषवर्षायते ॥२६॥

[साशङ्कम्]

इयमप्सरसः किमेति सिद्धे

प्रतिघाताय मयाभिकाङ्क्षितायाः ।

अथवा मदनुग्रहिष्णु देवो

रभसोपाह्रियमाणवाणकन्या ॥३०॥

[तत्प्रेक्ष्याभ्येनाम् । प्रकाशम्] भद्रे का भवती ।

नारी—महाभाअ किं मए विण्णादए जइ दुआरं घडिच्चजसि ता देइइ पूजां णिव्वत्तइस्सम् ।

(महाभाग ! किं मया विज्ञातया । यदि द्वारं परित्यजसि तद्देव्याः पूजां निवर्त्तयिष्यामि ।)

अनि—भद्रे ! जानासि न जपासनपरिग्रहिष्णोहत्थानमुचितम् । तदन्यद्वारेण भवती प्रयातु ।

नारी—महाभाअ किं णिमित्तं पुणो एसो पारद्धो जवणिअमे ।

(महाभाग ! किं निमित्तं पुनरेष प्रारब्धो जपनियमः ।)

अनि - अस्ति तावत्प्राज्ञजनपरिहसनीयं गूढप्रयोजनम् ।

नारी—[स्मित्वा] महाभाअ ! जइ ण कुप्पसि भणम्मि ण इरिस जव मत्तणीयमेण देवदाणं प्पसादोत्ति ।

(महाभाग ! यदि न कुप्यसि भणामि । नेदृश जपमात्रनियमेन देवतानां प्रसाद इति ।)

अनि—[स्वगतम्] सत्यमाह प्राणैरपेद्येण विना देवताः प्रसीदन्ति । [प्रकाशम्] केन तर्हि ?

नारी—साहसेण। (साहसेन)।

अनि—किं तत्साहसम् ?

नारी—किं ण जाणासि जं प्पडिवण्णं देवदाराहणे दशकण्ठादिहिम्।
(किं न जानासि यत्प्रतिपन्नं देवताराधने दशकण्ठादिभिः।)

अनि—आः कियदेतत्। [ससम्भ्रमम्] सखे! वकुलाङ्क खड्गः खड्गः।

नारी—मुद्ध णए त्थ कोऽवि दे अहं जेव खड्गं पच्छम्मि।
(मुग्ध! नात्र कोऽपि ते। अहमेव खड्गं प्रयच्छामि।)

[इति मण्डपकोणाद्वसिखड्गं प्रयच्छति।]

अनि—[गृह्णाति]

नारी—महाभाअ! साहसं अवलोएदुं भीदम्मि। ता अण्णदुआरेण प्पविसिअ देइं पूजइस्सम्।
(महाभाग! साहसमवलोकितुं भीतास्मि। तदन्यद्वारेण प्रविश्य देवीं पूजयिष्यामि।)

[इति निष्क्रान्ता।]

अनि—[खड्गमुद्यम्य] अम्बे! चण्डिके!

आवृत्तेक्षणपङ्कजाङ्कितमसृग्धारापयः प्रोक्षितं
कुर्वीय स्वयमेव सम्प्रति शिरो नैवेद्यमग्रे तव।
इन्द्रादित्रिदिवाधिवासिपरिपत्पूजोपहारामृत—
स्वीकारावसरे किमत्र न दृशं कोणस्पृशं निक्षिपेः ॥३१॥

[इति नेत्रे निमील्य शिरश्छेत्तुमिच्छति]

देवी—[प्रविश्य। खड्गमाच्छिद्य] वत्स! साहसिक! विरम। प्रसीदामि। किमभ्यर्थयसे ?

अनि—[दृष्ट्वा। सानन्दम्] अये कथमियं मद्भक्तितत्त्वजिज्ञासु भगवत्येव। दिष्ट्या पुण्यवतामन्यतमोऽस्मि। यतः—

अदूरेऽपि स्फीतानलनयनसिन्दूरमिहिरा—
वतंसेन्दुद्योतद्विगुणमणिकोटीरमहसाम्।
वहन्ती सम्पूर्णं किमपि कबरी कैतवतमो
ममोदभ्वत्यग्रे पुररिपुतपस्या परिणतिः ॥३२॥

अपि च—

कण्ठे मौक्तिकमाल[1]भारिणि मुखे दन्तावलीमञ्जुले
मातुः कोरकितेव कल्पलतिका मूर्त्तिर्मुदं तन्वती ।
प्रत्यक्षं यदलक्षि सम्प्रति मया सद्यस्तपो लेशतो
हेतुस्तत्र तदीयमेव नियतं दीनावधानव्रतम् ॥३३॥

[शिरसा प्रणम्य] भगवति !

लभेयं प्रेयस्या दिवि जिगमिषन्नद्य सविधं
मनोऽधीनान्तर्द्धाविधिसहचरीं खेचरगतिम् ।
परं चेदं[2]याचे किमपि मरुदामोदिनि भव—
त्पदाम्भोजद्वन्द्वे न मतिरलिवन्मे विरमतु ॥३४॥

देवी—वत्स ! स्तोकतरमेव तावदभ्यर्थितम् । भवतु सिद्धमेवावेहि । [इति निष्क्रान्ता]

अनि—[सविस्मयम्] कथमद्य कृतकृत्या वयं तत्पुनरत्र यावदाप्रभातं वर्त्तामहे । [पुरतो निर्वर्ण्य] इयमाविर्भवतैव प्राभातिकी सन्ध्या । असौ हि सम्प्रति प्रतिनितम्बतरुनिवहविघातह्रेषमाणनिजवाजिवीक्षणविस्तृत्वरवनमहिषविषाण-विक्षुण्ण गैरिकरेणुभिरिवारञ्जितो भगवानम्बरमणिरुदयाचलमलङ्कुरुते [सहर्षम् ।]

चलुकयति तमस्विनी समुद्रं गुरुतिमिरो चितमुल्लसत्करश्रीः ।
शमितमदनदर्पविन्ध्यवृद्धिः प्रसभमयं स गभस्तिमानगस्त्यः ॥३५॥

अपि च—

नूनं दण्डसमुद्यमव्यसनितासूनोरकिंचित्करी
दिग्वाटोनिकुरुम्बकस्य विगलत्ताराघलीकुट्मलाः ।
सन्ध्यापल्लवसन्ततिरपि तमो दूर्वामुहुश्चर्वणा—
दप्रीता इव भास्वतः कतिपयेगावोऽद्य यद्भुञ्जते ॥३६॥

अपि च—

यः सन्दर्शितभालपट्टनयने वालेन्दुचूडामणौ
मात्सर्य्याद्विभरांभूव चरणेनैवाग्रतो लोचनम् ।

1· (ख) दाम ।
2 (ख) मेव ।

नो विद्म पदविद्यमानदिनकृन्नेत्रस्य विष्णोरयं
किं वा संविदधीत गौतमऋषिः सम्प्रत्यसाधारणम् ॥३७॥

अपि च—

लक्ष्मीलीलागृहाणां दिनकरकिरणाः कष्टमम्भोरुहाणा—
मेते रोलम्बदौवारिकमुखरदलद्वारमन्तर्विशन्ति ।
पश्यन्तो राजहंसा अपि यदि तदिदं पक्षवन्तः क्षमन्ते
कः स्यादन्यः शरण्यः किमिति कुमुदिनी मोहिता राजदाराः ॥३८॥

अपि च—

हत्वा नक्षत्रलक्षग्रहनिवह भटान् ध्वान्तदन्तावलानां
संघैः सर्वाभिसारं सह विरचयतो युद्धखेदापनुत्त्यै ।
मन्ये यद्वीरपाणं प्रणयति तरणिः पानपात्राणि तत्रो—
दञ्चत्यद्धं प्रबुद्धं प्रचुरमधुभरी गर्भमम्भोजषण्डम् ॥३९॥

तदिदानीं कृतकृत्यो गच्छामि । [इति निष्क्रान्तः]

॥ खेचरसिद्धिर्नाम पञ्चमोऽङ्कः ।

—षष्ठोऽङ्कः—

[ततः प्रविशति पञ्चाङ्गपाणिरन्तःपुरज्योतिषिकः]

ज्योतिषिकः—[ऊर्ध्वमवलोक्य]

राशीन् द्वादशतारकाग्रहगणं सृष्ट्वैव यः सूर्यतां
विश्वस्मिन्नभितस्तमो जवनिका स्तोमावरुद्धे दधौ।
चक्रे यश्च गतिक्रमेण जगति प्राक्प्रत्यगादिप्रथां
श्रेयः शोणपुरीपतेः स तनुतां देवो ग्रहग्रामणीः ॥१॥

[हस्तेन भ्रूलेखामुन्नियम्य पञ्चाङ्गमातपे दृष्ट्वा] व्यतिक्रान्तैव तावद्वैशाखशुक्लत्रयोदशी।

[विचिन्त्य]

दिष्ट्या[1] यथा भगवती वचनमिह स्वप्नदर्शनमजनि वत्सायाः। साम्प्रतं च पद्मिनी मदनद्विरद[2]कदर्थितावसीदति। उक्तं हि वत्साचरितमनुयुक्तया मकरिकया। यथा—

प्रक्षामपाण्डुसरसीरुहपक्ष्ममात्र वक्षोरुहावरणमद्य वपुर्वहन्ती।
म्लायत्यनारतमियं विषमायुधेन माध्यन्दिनद्युमणिना नववल्लरीव ॥२॥

अपि च—

सा बिभ्रती रतिपतिप्रवणं शरीरं
घर्मागमे गिरिनदीव कमप्यणीयः[3]।
पाणौ भ्रमादपि समर्पितमङ्गुलीयं
विस्पष्टकङ्कणपदश्लथिमैव धत्ते ॥३॥

अपि च—

उत्थाय जातु सहसैव सखीसभायां
वत्सा कदम्बकलिका कमनीयमूर्त्तिः।
विश्रामयत्यधिकुचद्वितयं चिराय
दोर्वल्लरी वलयमर्पितमन्तरीक्षे ॥४॥

---

1. (ख) दिष्ट्या इत्युल्लेखो नास्ति।
2. (क) द्विरद।
3. (ग) किमप्यणीय।
अणीयः—अतिशयेन अणुः अणु+ईयसुन् = अत्यल्पम्।

अपि च—

सर्पा इत्यभितः करोति नलिनीनालानि वातायने
कस्तूरीद्रवपिण्डमिन्दुपुरतो राहुभ्रमादस्यति ।
भूयोभिश्च विलासकोकिलरवैरत्यन्तसंतर्जिता
क्रीड़ाकेकिचकोरकीरकुररीरप्यग्रतो नेक्षते ।।८।।

किं चासौ वत्सा व्यसनवार्त्तानतिनिगूढप्रायैव । अद्य हि चित्रलेखा चित्रफलके लोकत्रयतरुणानभिलिखितवती निभृतमन्तःपुरपुरन्ध्रयो मन्त्रयन्ते । तदहमवरोधेऽवधारयिष्यामि । [इति निष्क्रान्तः]

[ततः प्रविशत्युषा चित्रफलकपाणि चित्रलेखा च]

उषा—[निःश्वस्य] सहि ! विण्णादो सोइं सवणपुलिसो ?
(सखि ! विज्ञातः स किं स्वप्नपुरुषः ?)

चित्र- णहि णहि । किंदु एत्थ चित्तफलए भुवण त्तअ पुलिसा अहिलिहिदा तं जवदंसेम्मि ।
(नहि नहि किन्त्वत्र चित्रफलके भुवनत्रयपुरुषा अभिलिखितास्तावद्दर्शयामि ।
[इति चित्रफलकं प्रसारयितुमिच्छति ।]

[नेपथ्ये वीणाध्वनिः]

उषा—[आकर्ण्य] सहि ! कस्स एसो वीणासद्दो सुणीअदि । (सखि ! कस्यैष वीणाशब्दः श्रूयते) [विलोक्य । ससम्भ्रमम] कधं भअवां णारदो[1] । (कथं भगवान् नारदः)

[चित्रलेखा सहसा चित्रफलकमाच्छादयति]

उषा—[आसनादुत्थाय] सहिं ! अग्घभाजणं अग्घभाजणं (सखि ! अर्घ्यभाजनमर्घ्यभाजनम्)

नारदः—[प्रविश्य] वत्से ! कृतमत्यन्तसंभ्रान्त्या । ननु सुनृता वागेव तावदातिथ्याय पर्य्याप्नोति ।

उभे—भअवं प्पणमम्ह । (भगवन् ! प्रणमावः ।)

नारदः—अभिमतार्थभाजनं भूयास्तम् ।

चित्र— इदं आसणं अलंकरेदु भअवं । (इदमासनमलङ्करोतु भगवन्[2] ।)

---

1. (क) प्राकृतांशो नास्ति ।
2. (कखग) भगवान् ।

नारदः—[उपविश्य] ननु भवत्यावप्युपविशताम् ।

उभे —[उपविशतः]

नारदः—[उषां प्रति] वत्से ! किमतिकृशीयांसोऽवयवाः ?

उषा —[लज्जते]

नारदः—वत्से ! कृतमस्मासु लज्जया किं न वेत्सि वयमपि चित्रलेखावद्बहिरङ्गतयैव त्वयि वर्तामहे ।

चित्र —भअवं यौवणं ज्जेव उत्थरयति । (भगवन् ! यौवनमेव उत्तरयति ।)

नारदः—अपि नाम कुसुमकार्मुकः प्रगल्भते ।

चित्र —अधई । (अथ किम् ।)

नारदः—तत्कष्टमनिष्टमजनि[1] । अथ भवतीभिः किमत्र प्रतिविधीयते ? न व्याधिरौषधं विना शाम्यति ।

चित्र —ण किंपि । (न किमपि ।)

नारदः—[निःश्वस्य] चित्रलेखे !

अस्त्येव यौवनमिदं यदि चित्तजन्मा
विलसत्यति तत्किमियं[2] सहतां कुमारी ।
प्रालेय एव विपदेहि सरोरुहिण्या—
स्तत्रापि चेद्दहनकरी किमुदीरयामः ॥६॥

अपि च—

वपुरतिसुकुमारमन्तरङ्गं
विषमशरः स्वयमप्यसाहसज्ञा[3] ।
ऋतुरपि नवकोकिलाभिलापः
किमुदयते न दया भवादृशीनाम् ॥७॥

भवतु किमालम्बनमस्य मदनोदयस्य वयस्यायाः ।

चित्र —भअवं सवणदिट्ठो पुरिसो । (भगवन् ! स्वप्नदृष्टः पुरुषः ।)

नारदः—[सहर्षम्] किं नु देवीनिवेदितस्वप्नेन विजृम्भितम् ?

---

1. (ख ग) तत्कष्टमनिष्टमजनिष्ट ।
2. (ख ग) चेत्किमिदियं ।
3. (क) स्वयमप्यसाहिसंज्ञा ।

चित्र —अधईं । (अथकिम्)

नारदः—ननु विज्ञातः स्वप्नपुरुषो भवतीभिः ?

चित्र —भअवं सो कधं सवणो ज्जेव महि मत्तदिट्ठमूरति अविहिदाणवाअ णाममेओ अम्महं विणातव्वो ।

(भगवन् ! स कथं स्वप्न एव सखीमात्रदृष्टमूर्तिरविदितान्वयनाभधेयोऽस्माभिर्विज्ञातव्यः ।)

नारदः—तत्किं कश्चिदस्य विज्ञानपायः क्रियते ?

चित्र —जधामदि करीयदी । (यथामति क्रियते)

नारदः—कथय कथम् ?

चित्र —[चित्रफलकं प्रसार्य्य] एदं दाव चित्तफलअं मए अहिलिहिदं ।

(इदं तावच्चित्रफलकं मयाभिलिखितम् ।)

नारदः—[चिरं निरूप्य । सशिरःकम्पम्] वत्से ! बुद्धिमतासि त्वमसि । सखीगारयगुणाः प्रत्यापादि । [सविस्मयं च]

देवा हि मानवगणे ध्रियते यथा यो
वीक्ष्यामहे तमिह चित्रपटे तथैव ।
बिम्बैकरूपमपि यत्प्रतिबिम्बमाहु—
स्तत्प्रातिभासिकमिदं न तथा प्रतीमः ॥८॥

अपि च —

सोऽयं विहस्य तरुणो भणतीव मित्रं
भ्रूवल्लरीमयमुदञ्चयतीव किंचित् ।
पाणौ च दर्पणमयं वहतीव पश्यन्
कीराय चायमिदमर्पयतीव बिम्बम् ॥६॥

तदिदानीं त्वयैव सख्या[1] निष्पन्नप्रायमेवोषामनोरथं मन्यामहे ।

चित्र —[सविनयम्] तुम्भाणं आसीप्पसाएण सव्वं भविस्सदि ।

(युष्माकमाशीः प्रसादेन सर्वं भविष्यति ।)

नारदः—अपि लोकत्रयादर्शोऽयमदर्शि वयस्यायै ?

चित्र —दंसणावसरे ज्जेव भअवन्त आगमणं अन्तराओ ।

(दर्शनावसर एव भगवदागमनमन्तरायः ।)

1. (ख) सखी ।

नारदः— तल्लिखितानेतन्नामग्राहमुदीरयन्ती दर्शय । वयमपि त्वद्वचसां विधीनामिव प्ररोचनावादमुररीकर्तु वर्त्तामहे । [उषां प्रति] वत्से ! त्वमपि स्वप्नदृष्टमङ्गुल्या सूचयसि ।

उषा —[जन्मान्तिकम्] सहि कधं एदं भअवन्त अग्गे धट्टिअं करिस्सम् ?
(सखि ! कथमिदं भगवदग्रे धाष्टर्यं करिष्यामि ?)

चित्र —अई मुद्धे संसइद जीविदासि । किं दाणिं एदं विआरेसि ।
(अयि मुग्धे ! संशयितजीवितासि किमिदानीमिदं विचारयसि ।)

उषा —[अधोमुखं निःश्वसिति]

चित्र —[तूलिकया निर्दिश्य] अवि जाणादि इमं भअवं जो एसो खन्धे वीणादण्डं हत्थे अ अक्खमालिअं धारिअ चिट्ठदि ।
(अपि जानासीमं भगवन् ! य एष स्कन्धे वीणादण्डं हस्ते चाक्षमालिकां धृत्वा तिष्ठति ।)

नारदः —[विलोक्य । स्वगतम्] तत्कथं प्रथमतो धूर्जटेयमस्मत्प्रतिकृतिं दर्शयति । [विहस्य प्रकाशम्] वत्से ! लिखितवती त्वमेव जानासि । परन्तु—

अभिलिख्य कान्तिभरभर्त्सितस्मर
त्रिजगद्युवैधसविधे त्वमीदृशम् ।
अधिकृष्णसारनिकुरम्बमुच्छ्रितं
स्थविराच्छभल्लमिव हा लज्जसे ॥१०॥

चित्र —भअवं इअं देवणअरी । एत्थि अअं पुरन्दरो लोअवाला अण्णेवि ।
(भगवन्निय देवनगरी । अत्रायं पुरन्दरो लोकपाला अन्येऽपि ।)

नारदः —[दृष्ट्वा] वत्से । पश्यायममरावतीपतिः पुरुहूतः ।

पौलोमीवक्त्रचन्द्रोदयपरिचयमेत्यापि नापप्रभाणि
प्राज्य स्वाराज्यलक्ष्मीनिलयसरसिजानीव नेत्राणि बिभ्रत् ।
क्रन्दत्क्रकचादवन्द्यो विहितजवयशो गीतिरैश्वर्यसीमां
प्राप्नोति स्वप्नमैत्रीं किमयमसुलभामम्बदम्भोलिपाणिः ॥११॥

अपि च—

देवो वैवस्वतोऽसौ वितरति पयसामेष नेता प्रचेता
वातोऽयं जातवेदाः पुनरयमधिभूः सेवधीनामयं सः ।

तावेतावाश्विनेयौ रजनिपतिरसाविन्द्रमी सन्त्यमर्त्या
स्वप्नोपेतः किमत्रावतरति कतमः प्रत्यभिज्ञा कथं ते[1] ॥१२॥

अपि च—

निद्रानुसरदत्सरः प्रकरतालवृन्तावली
विलोलमहरी चलत्कमलमण्डली ताण्डवम् ।
द्विरुक्तमिव कुर्वती विद्रलोचनोदञ्चनैः[2]
स्थिनामरतरङ्गिणीतटरुह्[3]कुञ्जानातपे ॥१३॥

चित्र —[उषाभिप्रायमनुमाय] भअवं ओवि ण णाणिवासी सणविसओ वअस्साए ।
(भगवन् ! न कोपि नाकनिवासी स्वप्नविषयो वयस्यायाः ।)

नारदः—तदन्यतो दर्शय ।

चित्र —इद अहो भूअण जहिं दे सेसवासुइतक्खअप्पहुदओ अहिलिहिदाः ।
(इदमधोभुवन यत्रैते शेषवासुकितक्षकप्रभृतयोऽभिलिखिताः ।)

नारदः—[अङ्गुल्या निर्दिश्य]

शेषोऽय किमु सेमुषीमवतरे द्वौरेयभावौचिती—
स्तब्धोदग्रसमग्रपीवरतरग्रीवः प्रवीणे तव ।
यो नारायणधामनावतरणोत्सातपत्राणतां
क्षोणीमण्डलमापयन्निजफणाषण्डोषित[4] दण्डति ॥१४॥

अपि च—

यस्यैकान्तप्रदोषे फणमणिमहसादर्शितेऽधो जगत्यां
कन्दर्पः क्वापि नाध्यापयति फणिवधूरन्धकाराभिसारम् ।
सोऽय सांख्योपदेष्टृ प्रतनु[5] तरजयोगपट्टायमानः
शम्भुज्याभाव जीर्यद्द्रपुरहिनिवहैर्वासुकिः साकमास्ते ॥१५॥

1. (ग) प्रत्यभिज्ञयंते (ख ग) पुस्तके श्लोकोऽयं १३शाङ्के १३शोऽपि १२शाङ्के लिखितोऽस्ति ।
2. (क) द्रुघनैः ।
3. (ख तटतरु ।
4. (ख ग) षणोऽर्पितं ।
5. (क) प्रतन ।

अपि च—

इमाः कुलिकतक्षकप्रभृतयः फणिश्रेणयो
जयन्ति यदधिष्ठित प्रकटयत्यधः पिष्टपम्।
बलिव्यसनवीक्षणावधि विमुक्तपानाशन-
स्फुरद्धमनिरोगयोगजमिवात्मनो वैकृतम् ॥१६॥

चित्र —भअवं इअं अदिक्कन्दवदी सही दिट्टि अहोभुअणदाणीं भूलोअं अहिरोहदि। [चित्रशालाकया सूचयित्वा] एदे च मअधमहुरावन्दीमद्दमाहिस्मदी विदब्भहत्थिणाप्पदुदिभूपदओ।
(भगवन्नियमतिक्रान्तवती सखी दृष्टिरधोभुवनमिदानीं भूलोकमधिरोहति। एते च मगधमथुरावन्तीमाद्रमाहिष्मतीविदर्भहस्तिनाप्रभृतिभूपतयः)

नारदः—[विलोक्य] अयमसौ मगधमेदिनीपतिः।

संख्ये खड्गास्त्रिवेगस्रवदसृगसृग्वारिधारावतारा—
दूर्षत्तिविष्यर्कीर्त्तिव्रजकपटवृहद्धूमवत्सु द्विषत्सु।
प्रायोदाहायसाहायकमिव करिणीकर्णतालानिलौघै—
र्द्राघीयाल्लम्भितोऽस्य ज्वलति भुजमहो जातवेदः प्रभेदः ॥१७॥

एष मथुरानिवासो नरपतिवतंसः।

देवद्रक्षोऽपि[1] पञ्चत्वममरतरवः स्थूललक्षस्य[2] यस्य
स्वर्नारीव्रातगीतां वितरणसुकृत[3] श्रेणिमाकर्ण्य भेजुः।
विस्पष्टं बद्धमुष्टिः परमथ विमुखीकर्तुमेष प्रवृत्तो
मन्ये जन्ये स्वमुच्चैरसिमयमयशोराशिमङ्गीकरोति[4] ॥१८॥

अयमवन्तीनगरवास्तव्यो नरपतिः।

शाङ्के यत्पाणिपङ्केरुहकलितवृहत्खड्गवल्लीनिकृत्त-
द्विड्भूभृन्मतदन्तावल करटतटोन्मुक्तमुक्तालिदम्भात्।
संराजद्राजराजौ दरदरविदलन्मालतीमालयाजौ
वीर य बद्धरागा स्वयमपि चपला वैरिलक्ष्मीर्वृणीते ॥१९॥

1. (ख ग) देवोद्रक्षोऽपि।
2. (क) स्थूललक्ष्यस्य।
3. (ख ग) स्वर्नारीव्रातगीतां वितरलकुतुक।
4. (खगङ) आश्चर्यं बद्धमुष्टि परमति विमुखीकृत्य नित्यं स्थितोऽसावुनीसन्मण्डलप्रिछलमिलद-
शौराजिमाजौ बिभर्त्ति।

अयं च मद्रदेशपद्माकरदिनकरो राजा ।

दोरुद्दामप्रतापानलपटलपुरः प्रस्फुरद्धूमलेखा[1]
केशग्राहं गृहीताहितगणगृहिणी कल्पकीर्त्तिप्रवेणी[2] ।
हेतुर्विद्वेषिपक्षक्षयकरणविधावुत्थितो धूमकेतु—
र्यस्योत्पश्यन्ति पाणाविति विलसदसृग्वीरपाणम् कृपाणम् ॥२०॥

अयमपि माहिष्मतीपालयिता मनुजलोकरजनीपतिः ।

प्रस्थाय्येव हयच्चलखुरपुटक्षोदैर्दिशो रोदसी
घस्ते ऽपीह[3] मही विहौजसि रणक्रोडेक्षणं क्रीडती ।
प्रस्तारातियशो निशापतिरदच्छद्मास्य निर्यच्छवे—
रेतद्दन्तीविधुन्तुदादि[4] वरविस्रतः किमतं गतः ॥२१॥

अयं च विदर्भविषयवसतिर्वसुमतिपतिः ।

मन्ये मौक्तिकशालितण्डुलततीर्विद्वड्राजानामय
गण्डोलूखलमण्डलाग्रमुषलावस्कन्दसंदर्शिताः ।
वैतुष्यं कलि कर्णसूर्पनिवहैर्नीता स्वविश्राणनं
क्षीरेण श्रपयन् प्रतापदहने प्राप्तो यशः पायसम् ॥२२॥

उषा —[नेत्रे विवर्त्तयन्ती परतः पश्यति]

चित्र— भयवं अलं इदो दंसणेण हिए कदमो विअ एत्थि सवण विषओ महीपदी ।

(भगवन् ! अलमितो दर्शनेन नह्येकतमोऽप्यत्र स्वप्नविषय महीपतिः ।)

नारदः—वत्से ! विलोकय धर्मसेतुरय राजा युधिष्ठिरो नाम ।

यद्येतद्यानपाशो भरितवसुमतीमीक्षितं लज्जमाना
वत्तानादेव गव्यो दधाति गतिमियं पाशवी बुद्धिरेव ।
मन्दारादीनुदारानमरविटपिनोऽवाङ्मुखीकृत्यधावं
धावं धावा प्रथिव्योर्नो किमु परिवदोवर्त्यदो दानकीर्ति ॥२३॥

चित्र— हला इदो विअण अणं अचरोवेन्दी कदरं कामेसि ।

(सखि ! इतोपि नयनमवरोपयन्ती कतरं कामयसे ।)

---

1. (ख ग क) संचरद्धूमलेखा ।
2. (ख ग क) गृहीतप्रतिधरणिपति श्रीवधूचित्रन्मवेणी ।
3. (क) घस्ते ऽपीह ।
4. (ख) निशापतिरदच्छद्मोस्यवरकौमुदीवमकाद्दन्तविधुन्तुदादि ।

नारदः—चित्रलेखे ! प्रनष्टधनद्रविणमिवेदानीमपि वत्सानयनद्रवमन्विष्यति । तत्कृतमेनामायासयितुम् । दर्शय कतमा द्वारावती । नहि विधिनायद्रूते निर्मितमुषाभिलाषभाजनमिति जानीमः ।

चित्र— [तिर्यक् चित्रफलकं दर्शयित्वा] इअं सा दुआरवदी (इयं सा द्वारावती[1] ।)

नारदः—[सहर्षम्]

स्वः पातालमहीतलावतरणव्यर्थव्यथाविह्वले
नेत्रे द्वारवती प्रयागमभितो मातः क्षणं पातय ।
एताभ्यामिह रोहिणी तनुजनुः पद्मालयानाथयो—
र्यस्मादत्र सितासिते हि सरितौ लब्धुप्सितं लप्स्यते ॥२४॥

अपि च—

दष्टाङ्गुष्ठनखस्फुरन्मुखविधुविश्रब्धमालकय—
न्मार्कण्डेयमयं वटच्छदपुटक्रोडे शयानः शिशुः ।
अम्भधावधिगत्य भंगपटलिभङ्गीभिराघूर्णितो
दोलारोहणशर्मकल्पसमये तल्पोरगं व्यस्मरत् ॥२५॥

अपि च—

धृतनिखिलभरो निनागतारी
फणिपतिराश्वसितूत्तम ततीव ।
प्रबलहलविघट्टनेन देवः
क्षणमयमुद्धरति स्म कौरवोर्वीम् ॥२६॥

[इति गोविन्दबलदेवौ दर्शयति]

उषा— [सबहुमानमभिवादयते]

नारदः—[सस्मितम्] चित्रलेखे ! न द्वयस्या रेवतीरुक्मिण्योरन्यतरस्या[2] प्रत्यर्थिनी भवितुमर्हतीति ।

चित्र— एसो रुक्मिणीणन्दणो पज्जुम्णो । (एष रुक्मिणीनन्दनः प्रद्युम्नः)

नारदः—[विमृश्य] अयं खलु अहल्या पुरुहूतयोः सरस्वतीपितामहयोर्गुरुवधूसुधामयूखयोरकीर्तिकन्दली जगदागमः कमनीयता प्रथमनिदर्शनं मकरकेतुः ।

1. (क ग) द्वारवती ।
2. (ख ग) अन्यतरस्या इत्युल्लेखो नास्ति ।

[व्यहस्य । सोत्प्रासम्]

वाचाला: कवयो जगत्त्रयमहाधन्वीति संतन्वता[1]—
मस्याभ्यस्य यशः प्रशस्तिमियतीमेतन्न मन्यामहे ।
एतस्यापि हि कोऽपि गोपितवपुर्जैत्रः स्मरो वर्त्तते
रत्यासक्तिरतिव्रवीति यदयं न ब्रह्मचर्य्यव्रती ॥२७॥

चित्र —[सभयमपि] जधा तधा णिन्ददु भअवां प्पसिद्ध महिमाज्जेव अअं विसमेसु विट्ठवेसु ।

(यथा तथा निन्दतु भवान् प्रसिद्धमहिमैवायं विषमेषुः पिष्टपेषु ।)

उषा —[विचिकित्समाना निर्वर्णयति]

नारदः—वत्से ! कथमलिनी कण्टककेत मिव त्वमेनमपि न रित्यजसि न वा स्वीकुरुषे ।

चित्र— हला किं एसो भविस्सादि । (सखि ! किमेष भविष्यति)

उषा— [भ्रूसंज्ञयानिरावष्टे]

नारदः —अयं च मकरकेतनापत्यमनिरुद्धः ।

धत्ते सन्तानसन्तानकतरुरमृतस्यन्दिगर्भेन्दुबिम्ब ।
कल्पद्रुमावापः प्रसूनस्तवकमिव नवं स्ववधूप्रार्थितं यम् ।
सोऽयं त्रैलोक्यपारंगमगुणगरिमाग्रामणीर्यादवानाम्
तन्वङ्गी स्वप्नसङ्गी तव कवचहरः किं बभूवानिरुद्धः ॥२८॥

उषा —[सहर्षमङ्गुल्या निर्दिश्य । पुलकिताङ्गं स्मियति ।]

चित्र —[विहस्य । साकूतम् । संस्कृतमाश्रित्य]

दृष्टाश्चक्रधरादयस्त्रिचतुरास्तिष्ठन्त्यमी वृष्णयो
भूयिष्ठानि शठोल्मुकप्रभृतयः किं वा न तानीक्षसे ।
आवर्त्ते किमु नौरिवाश्रुसलिलप्रस्यन्दसान्द्रीकृता
दृष्टिः सम्प्रति भूरिधामनि मनोजन्मात्मजे मज्जति ॥२९॥

अपि च—

प्रायः समुच्छ्वसिति यन्मणिमेखलेऽयं
कृत्स्नैव यत्पुलकिता च कपोलपाली ।

---

1. (ख ग) संतन्वता ।

सप्रत्यभिज्ञमिव यत्प्रविलोकसे च
स्वप्ने तवैष पुरुषो विषयः किमासीत् ॥३०॥

नारदः—[उषां विलोक्य] वत्से !

विकृतिरमरसद्मादमारुह्यां द्वैतमिन्दोः
परिणतिरसमेषारैश्विनोरैकरूप्यम् ।
किमपरमवतारः श्रीधवस्यानिरुद्धो
यदि पुनरनुरागस्थानमानन्दितोऽस्मि ॥३१॥

चित्र— भअवं किअणेण चित्त दिट्ठणे ज्जेव सही मअण वेअणा विणिवट्टदि ।
(भगवन् ! किमनेन चित्रदृष्टे नैव सखी मदनवेदना विनिवर्त्तते ।)

नारदः—चित्रलेखे ! तत्रापि त्वमेवोपायः ।

चित्र— [विहस्य भअवं समुद्दणअरमभवट्टिणि तत्थि किमए विहेअं ता भअवांज्जेव जाणादि (भगवन् ! समुद्रनगरमध्यवर्त्तिनि तत्र किं मया विधेयं तद्भगवानेव जानाति ।)

नारदः—[विचिन्त्य] वत्से ! अहमेव तमानयिष्यामि । किन्तु सखीवचनं त्वायं दूतनिवेदनप्रायं वनितानामिति पुंसां रसोत्कर्षाय । तदिदानीम्—

अपि सप्तार्णवीपारलङ्घने शक्तिदायिनीम् ।
विद्यां ददामि यामङ्गीकृत्य द्वारवतीं व्रजेः ॥३२॥

चित्र— हला चिरेणा क्खु णिप्पन्ना दे मणोरहा ।
(सखि ! चिरेण खलु[1] निष्पन्नास्ते मनोरथाः ।)

नारदः—वत्से ! तदिमां मनःशौचेन गृहाण । [इति कर्णे जपति · उषां प्रति] वत्से ! अनुजानीहि । साधयतु चित्रलेखा द्वारवतीम् ।

उषा—[सवैक्लव्यमिव] योभअवं आणवेदि । (यद्भवानाज्ञापयति)

चित्र —[चित्रफलकं मुद्रयित्वा। विहस्य] हला किंपि वाचिअं अनिरुज्झे चिट्ठदि ।
(सखि ! किमपि वाचिकमनिरुद्धे तिष्ठति ।)

उषा—[सक्रोधमिवावलोकयति]

नारदः— आश्चित्रलेखे ! किमेतां पृच्छसि । नन्वस्त्यस्माकमनिरुद्धे वाचिकम् । यथा—

1. (ख) चिरेण खल्वित्युल्लेखो नास्ति ।

नितम्बिनी का न वशम्बदा मे
कन्दर्पसूनोः किमहं त्वदिष्ये ।
इति त्वया नैव विभावनीयं
जनोऽनुरागी किमुपेक्षणीयः ॥३३॥

चित्र—[सविनयम्.] एवं उजेव कधेइस्सम् । [उत्थाय साश्रुपातम्.] भअवं जाव आगच्छम्मि दाव सही पेक्खणीआ ।

(एवमेव कथयिष्यामि । भगवन् यावदागच्छामि तावत्सखी प्रेक्षणीया ।)

नारदः—[विहस्य] चित्रलेखे ! त्वयापि किं वयमेतदर्थमवधापनीयः ।

आलीविलासकलहे विमनायमाना
गौरीगिरापि न दुराग्रहमुत्सृजन्तीम् ।
या शैशवे समुपनीय निजाङ्कदेशं
वीणारवेण सम शान्त्ययमेक एव ॥३४॥

चित्र—भअवं तधाविअ सिणेहभारो मं मुहरी करेदि ।

(भगवन् ! तथापि स्नेहभारोऽपि मां मुखरीकरोति ।)

नारदः—वत्से ! आगत्य भवत्या सार्द्धमनिरुद्धेन प्रमदवनमेव गन्तव्यम् । आवामपि तत्रैव स्थास्यावः ।

चित्र— [प्रणिपत्य निष्क्रान्ता]

नारदः—वत्से ! किमतिकातरासि ?

यावत्युदञ्चितचरी नियमक्रिया मे
तस्यै शपे वत विदांकुरु योजयित्वा ।
अद्यानिरुद्धविधुनाकुलजकौमुदीं त्वां
वैवाहिकेन विधिना व्रजितुं यतिष्ये ॥३५॥

अपि च —

कुसुमेषु कुमारमद्य वत्से
पुरुवंशाभरणं शकुन्तलेव ।
अपि सम्मतिदानमन्तरेण
स्वगुरूणां परिणेतुमुत्सहेथाः ॥३६॥

अपि च—

निदानं यस्य त्र्यम्बकमुकुटरन्तं हिमरुचि-
र्नरहृदमा यस्मिन् भगवदवतारो विहरते ।
यदुत्पत्तिं धत्ते त्रिजगदभिजेता मनसिजो
भवित्री तद्गोत्रे सुकृतनिधिरद्यावधि वधूः ॥३७॥

वधा— [स्वगतम्] अवि णाम दैवं एवं करिस्सदि ?

(अपि नाम दैवमेवं करिष्यति ।)

नारदः—वत्से ! गच्छ प्रमदवनवनमेकाकिनी । वयमप्यनन्तरं साधयामः ।

वधा— जं आणवदि । (यदाज्ञापयति) [इतिनिष्क्रान्ता]

नारदः—[सहर्षम्]

अद्यैव शोणनगरीरमणाभिचारा-
च्छिद्रावधारणविधिं मुनयः श्रयन्तु ।
शक्रोऽपि पत्ररचनात्मक[1] निष्ठकीर्ति-
वर्णस्वधूरसिजयो विषयीकरोतु ॥३८॥

अपि च—

बाणैर्यादवनायकस्य कथया बाणोऽवशिष्येत चे—
त्किं नस्तेन परं पुलोमतनया जाने रसावुत्सवः ।
श्रद्ध्मो वयमेतदेव कुतुकाड्म्भोऽयमारोपितो
यत्प्रौढः फलडम्बरैः कलितरुर्लोके विलोकिष्यते ॥३९॥

भवतु तत्रैव गच्छामि

[इति निष्क्रान्तः]

नायकनिर्णयो नाम षष्ठोऽङ्कः

---

1. (क) पत्ररचनात्मव ।

—सप्तमोऽङ्कः—

[ततः प्रविशत्याकाशमार्गेणानिरुद्धश्चित्रलेखा च]

अनि— [चिरं विमृश्य] चित्रलेखे !

ये वैमानिकनाकिनामपि गतिं नाडीमृजाम्रेडितं
प्राणायामपरंपरावशमरुद्वेगास्तिरस्कुर्वते ।
तेषामन्यतमोऽहमस्मि वचसा मातुर्महायोगिना-
मीदृग्दुर्गतमं जवेन यदतिक्रान्तो वियत्प्रान्तरम् ॥१॥

अपि च—

न स्थाणुव्यतिषङ्गदुःखमपि न स्थूणाभिमर्शव्यथा
विन्यासव्यसनं न वा चरणयो[1]रस्माभिरासाद्यते ।
चक्रे चेतसि वासना तु महती नैसर्गिकोर्वीपते—
रस्मिन भ्रंशभिया विहङ्गमघटाघण्टापथे वेपथुम् ॥

चित्र— महाभाअ णत्थि क्खु दुक्करं देवआ वअणस्स ।
(महाभाग ! नास्ति खलु दुष्करं देवता वचनस्य ।)

अनि—[सर्वतो दृष्ट्वा] रमणीयमिदं वः प्रमदवनम् । अत्र हि—

नवपल्लवपाणिवेपनै—
र्व्रततीरात्मनिवारिणीरिव ।
हरिणा अपि हन्त मन्यते[2]
विपुलावालपयः पिपासवः ॥३॥

अपि च—

पटलमलिवधूनामन्वगन्वग्भविष्णु
प्रतिपदमदरम्यस्यास्य[3] झङ्कारदम्भात् ।
विदधति लतिकानां सौरभस्वापहारं
मलयमरुति चौर्यंकारमाक्रोशतीव ॥४॥

---

1. (क) चिरपयो ।
2. (क) मन्यसे ।
(ङ) हन्ति मन्यते ।
3. (क) रम्यस्फार ।

चित्र—[सविनयम्] सांपदं उणो तुम्भाणं अणुग्गहेण अदिरमणीअं त्ति भणिअदु।

(साम्प्रतं पुनर्युष्माकमनुग्रहेणातिरमणीयमिति भण्यताम्।)

अनि—[कियन्ति पदानि गत्वा। पुरो निर्वर्ण्य। ससम्भ्रमम्] कथं भगवान्नारदोऽस्यत्रैव।

चित्र— ण केवलअम्माणं वअस्साविं। (न केवलमस्माकं वयस्यापि।)

[ततः प्रविशति नारद उषा च]

नारदः—[विलोक्य] कावेतौ? [निरूप्य। सहर्षम्] कथं चित्रलेखानिरुद्धावेव। हन्त, चिरेण विरमति नः शङ्कानिशिथिनी। सम्प्रति च—

प्रदर्श्य रम्यां धुरि चित्रलेखां
भरेण भासामनिरुद्धमिले।
पुरःस्फुरत्यत्र न किं समग्रा—
मुषारुचिं तामरसेव मुञ्चेत्॥५॥

उषा— [विलोक्य। लज्जयापयातुमिच्छति]

नारदः—वत्से! किमेनमतिथिमस्माज्य गन्तुमौचितिः?

[इति हस्तं गृहीत्वा स्थापयति]

अनि— [उपसृत्याभिवादयते]

चित्र— [सविनयम्] भअवं अणिरुज्झो वि अहिवादेव।

(भगवन्! अनिरुद्धोऽभिवादयते।)

नारदः—[सहर्ष सम्भ्रमम्] वत्से! किमन्यदाशंसनीयमस्यानिरुद्धस्य। तथापि—

उपेयिवांस्तातपितामहोपमः
कुटुम्बिनीं मातृपितामही समाम्।
विजित्य शत्रूनभिनन्द्य बान्धवान्
दिनानि दाम्पत्यरसैर्विनेष्यति॥६॥

अनि—[स्वगतम्] साकूतं खल्वेतदाशीर्वचनम्।

---

1. (खगङ) मित्रे।
2. (कग) समग्रामुषोरुचि

चित्र—भअवं कदमा उणो अस्स कुडुम्बिणी तुम्मेहिं अहिमण्णेदि। (भगवन्! कतमा पुनरस्य कुटुम्बिनी युष्माभिरभिमन्यते । [इत्युषामवलोकयन्ती स्मयते]

नारदः—वत्से! किमिदमविदितवतीव वदसि।

यदुपलब्धिमनोरथवागुरा
विनय[1] गर्भगतं कलयन्मुहुः।
शरकदम्बमलम्भयदस्य हृ—
न्मयकुरङ्गमनङ्ग जनङ्गमम् ॥७॥

अपि च—

चेतो भूरिगुणात्मये परिपणीकृत्य प्रयच्छन्न् ता
च्छायत्तमसावनन्यविषयं कृत्वा यदीयं मनः।
क्रेतुं प्रेतगणा परोक्षमकरोत्प्राङ् मूल्यमर्चिर्मुखी
पाणिस्पृष्टकृपाणमुष्टिरभसभ्रं शोच्छ्वसत्स्वं शिरः ॥८॥

चित्र— हला एवं असम्मणो हरन्दी सा तुमं जेव्व।
(सखि! एवमस्य मनो हरन्ती सा त्वमेव।)

उषा— [दृशा तर्जयति]

नारदः—वत्सानिरुद्ध! श्रान्तोऽस्यत्र शाद्वले तादुपविश।

अनि— [सविनयमुपविशति]

नारदः—चित्रलेखे! त्वमपि सखीमुपविश्योपविश।

उभे— [उपविशतः]

उषा— [स्वगतम्] हद्धि हद्धि कुलकण्णिआरलिदं अवधीरेन्दी परपुलिस समक्खं चिट्ठमि। अहवा भअवन्त अधीणाए किं अणुदावेण।
(हा धिक् हा धिक्, कुलकन्यका चरितमवधीरयन्ती परपुरुषसमक्षं तिष्ठामि। अथवा भगवदधीनायाः किमनेनानुतापेन।)

अनि—[उषां विलोक्य स्वगतम्] चिरेण खलु दिष्ट्या वर्द्धामहे।

दिदृक्षया यस्य चिरेप्सितो मे
प्रस्मारितः स्वप्नलवः स्मरेण।
मुखेन्दुमिन्दीवरनिन्दिनेत्रं
तमेव दैवादवलोकयामि ॥९॥

1. (खगक) वलय।

अपि च—

विधिरामयाविन[1]इवौषधिमिमां
तृषिताय तोयमिव वा प्रयच्छति ।
अनिमेष समयोऽपनीयतां
परिपीयतां च नयने नितम्बिनी ॥१०॥

[विमृश्य सविचिकित्सम]

वसन्तवसतौ वने मकरकेतने कौतुका—
दिहैव पिहिते स्थिता रतिरियं किमेकाकिनी ।
दिवो निभृतमागतं सुचरितक्षये वा स्वयं
पुरुरवसमुर्वशी मृगयितुं किमुर्वीगता ॥११॥

[प्रत्यक्षं निर्वर्ण्य]

पाणौ यन्निहिताविह श्रुतियुगं भ्रूवल्लरीशृङ्खला
वेणीबन्धकशानिशं च नयनच्छाया पुनस्तद्भ्रमि[2] ।
तद्वन्दीकरणाय विश्वतरुणश्रेणीदृशां कल्पिता—
कारामाकरकेतवीति वदनं वामभ्रुवो मन्महे ॥१२॥

अपि च—

लावण्यार्णवमीनकेतनतिमिक्रीडोर्मिनर्मोदय-
क्षिप्तश्लक्ष्णतिकम्बुरम्बुजदृशः कण्ठोऽयमस्याः किमु ।
वक्षोजाचलचारुयौवनवनस्तम्बेरमाडम्बरो-[3]
दस्ता काचन वल्लरीयमपि किं रोमावली शोभते ॥१३॥

अपि च—

यज्जङ्घोरुनितम्बबिम्बविषये शोभापयः पिच्छिले
मध्ये च द्व्यणुककृशीयसो तटे नाभी सरस्या अपि ।
उन्मीलद्भ्रमिकेलिरप्यनलसा तारुण्यलक्ष्मीरसा-
वस्या हेतुरमुत्रगुल्फगुटिकासिद्धिः समग्रा किमु ॥१४॥

1, (ङ) विधिरवामयाविन इवोषधी
आमयोऽस्त्यस्य आमयोऽसंख्यानं इति दीर्घश्चेति विनिः आमयाविन् रोगी ।
2. (क) कशाऽनिपक्ष्मनयमच्छायपुमत्तद्भ्रमिः ।
(गङ) पाशौ
3. (क) स्तम्भेरमाडम्बरो ।

[साशङ्कं च] कथमिदानीमपि सहासनादियन्तो न विश्रम्भवतीयमितरानुरक्तेव यत्क्षणमपि न मामवलोकयति । अथवा—

मन्ये स्मेरयति क्षणान्नववयो वैहासिकः स्वैरिणीं
राज्ञः साम्प्रतमाज्ञया रतिपतेर्लाविण्यलक्ष्मीमिमाम् ।
शालीना तु निसर्गतोऽथ गमिता लज्जासखीयन्त्रणा-
मस्या मज्जति कोण एव निभृतं दृष्टिः स कुर्वीतकम् ॥१५॥

[पुनर्निरूप्य] हृदय ! समाश्वसिहि ।

मुहुर्मुहुरपत्रपा प्रणययौगपद्येन मां
न पश्यति च पश्यति क्षणमलक्षितं च प्रिया ।
मनोभववरूथिनी विजयवैजयन्तीनिमा-
दसीयनयनद्वयी खलु गतागतैः खिद्यते ॥१६॥

चित्र— [जनान्तिकम्] हला विस्सद्धं विलोएहि णंअ अंज्जेव तुह मणसउणा पञ्जरी भोदि ।

(सखि ! विश्रब्धं विलोकय । नन्वयमेव तव मनःशकुन[1] पञ्जरी भवति ।)

नारदः—[स्वगतम्] सम्प्रति विधेयार्थनाटकस्य प्रस्तावनामुदञ्चयिष्यामः । [प्रकाशम्] वत्सानिरुद्ध ! किमस्मद्वाचिकमुक्तवती चित्रलेखा ।

अनि—[सविस्मयलज्जम्] भगवन्नुक्तवती ।

नारदः—तर्कि बहुना । लज्जामपनीयैतावत्कथय यदस्यामनुरागस्ते द्रढीयानिति ।

चित्र—भअवं अण्णधा कहिं बाणणअरी कहिं अणिरुद्धो ।

(भगवन्नन्यथा कुत्र बाणनगरी कुत्रानिरुद्धः ।)

अनि— यच्चित्रलेखा भणति ।

नारदः—किं च ।

भवदङ्गसङ्गरसलालसोरगी
रदनायमानमदनेषु दंशिता ।
किमवैपि पूरुषवतंस योषिता-
मपि मौक्तिभूषणमियं विषीदति ॥१७॥

---

1. (ख) शकुनी ।

अनि— [सवैक्लव्यलज्जम[1]] भगवन्नवैमि ।

नारदः—तदिमां नैसर्गिकानुरागिणीं परिगृहाण [उषायाः पाणिमाकृष्यमाणमप्यादाय] चित्रलेखे !

तस्मै जनाय करमात्रमपि प्रदातुं
वत्साद्य नेच्छति न मादृगनन्तरङ्गम् ।
प्रत्यक्षसाक्षिणि निजश्वशुरे[2] कथं वा
कुर्वीत सर्वसनुदानमपत्रपिष्णुः ॥१८॥

[इति विहस्य बलादनिरुद्धहस्ते समर्पयति ।]

अनि— [सबहुमानसम्भ्रमम्] भगवन् !

इदमतिरमणीयमेतदीयं
करकमलं मम धारणीयमेव ।
अथ भगवदनुग्रहो महीया—
निति नितरामधिमौलि खेलयामि ॥१९॥

अपि च—

सन्तापशान्तिमथवा ननु भूतपूर्वां
प्रस्वेदवारिनिकुरुम्बकरम्बितोऽस्याः ।
दिष्ट्या मदीय हृदयं करपल्लवोऽय—
मासादितो नखरकोरकितः करोतु ॥२०॥

[इत्युषाहस्तं शिरसि निवेश्य हृदये निदधाति]

उषा— [हस्तमाच्छिद्य । आत्मगतम्] कधं इदाणिं अघटणघटणाविचक्खणत्तं फुरदि दइवस्स अहिवा भअवन्त णारदस्स ।

(कथमिदानीमघटनघटनाविचक्षणत्वं स्फुरति दैवस्य अथवा भगवतो नारदस्य)

नारदः—वत्सानिरुद्ध ! वत्से ! उषेऽप्यभिनन्दथो युवां दम्पती ।

चित्र— अवि भअवं अहिणन्दि । (अपि भगवानभिनन्दति ।)

नारदः—कः सन्देहः । परं त्वनिरुद्धमप्रेक्षमाणस्य चक्रपाणेर्वैमनस्यमाशङ्क्य दूयामहे । स किल सूतिकानिकेतनात्प्रद्युम्न चौरिकावधिबन्धुजनमन्तरेण शङ्कमानमानसः क्षणमपि न मोदते ।

अनि— भगवन्ममापीयमेव चिन्ता । तत्किमत्र कर्त्तव्यम् ।

---

1. (ख) सवैक्लव्यम् ।
2. (कखग) श्वसुरे ।

नारदः—वत्स ! विधियत एवोपायः। चित्रलेखे ! लिख पत्रिकामिदानीम्। यथा—
श्रीमत्कमलासनसूनुमुनिजनाभिमतनारदपूज्यपादानां वैकुण्ठनगराधिकारिणि मनुजावतारिणि गोविन्देऽनन्तमाशीर्वचनम्। स्वस्त्यत्र। तत्रत्यमपि श्रोतुमाशास्महे। सम्प्रति बाणपुरे वयं वर्त्तामहे। अत्र च मिकपि रत्नमलम्भि पौत्रेणानिरुद्धेन। तदिदानीमागत्य गरुडवाहनेन भवता बलभद्रप्रद्युम्नाभ्यामयं द्रष्टव्य इति।

उषानिरुद्धौ—[मुख्मा हृष्ट्वा जे ते]

चित्र—[लिखित्वा पत्रिकां समर्पयति]

नारदः—[गृहीत्वा। सर्वतो निर्वर्ण्य] वत्से ! व्यतिक्रान्तप्रायमेव[1] दिवसम्। तद्वयमेतां पत्रिकां प्रियसुहृदा पर्वतेन संप्रेष्य सन्ध्यामभिवन्दिष्यामहे। सम्प्रति च मामितोऽनुजानीहि गन्तुम्। [इत्युत्थाय] वत्से ! चित्रलेखे ! भवत्योरपि निलयमौचितीं गन्तुं विसृज्य वत्समेकमपरिचितप्रदेशे। [इति निष्क्रान्तः]

अनि—[आत्मगतम्] कथमियमुन्मनायते भगवन्तमन्तरेण। तदिमां शान्त्वयामि तावत्। [प्रकाशम्] चित्रलेखे।

स्वप्नोपभोगदिवसावधि चेतसा मे
जन्मान्तरीण गृहिणीत्युदिता तथेमाम्।
मह्यं ददौ स भगवानथवानुरागः
स्वस्या न विश्वसिति किं मयि सम्प्रतीयम् ॥२१॥

चित्र—अज्ज ण अच्छरीयं एदं। ण क्खु सहजलज्जाभरमसिणमाणसा जुवतओ णाअएिव वहरन्ति वसद्धम्।
• (आर्य्य ! नाश्चर्यमिदं न खलुसहजलज्जाभरमसृणमानसा युवतयो नायकेऽपि व्यवहरन्ति विश्रब्धम्।)

उषा—[आत्मगतम्] साहु उत्थरेदि प्पिअसही[2] (साधूत्तरयति प्रियसखी)।

चित्र—अज्ज सम्पदं इअं गोरीव्व गङ्गाधरस्स लच्छीव हरिणो तुहप्पिसही संवुत्ता।
(आर्य्य साम्प्रतमियं गौरीव गङ्गाधरस्य लक्ष्मीरिव हरेस्तव प्रियसखी संवृत्ता।)

अनि—[विहस्य] चित्रलेखे ! किमिदमुदीरितं नाम।

---

1. (ख) वत्सेऽतिक्रान्तप्रायमेव।
2. (क) पुस्तके प्राकृतांशो नास्ति।

पातुं नार्हति माधुरीमधरयोर्नालिङ्गितुं च स्तनौ
नेतुं नापि नितम्बमङ्क[1]मरसः शङ्केऽर्द्धनारीश्वरः।
चापल्यादिव चक्रपाणिरबहिर्निर्य्यापितां वक्षसा
बिभ्राणः श्रियमीदृशो न किमलङ्कारा हि हारास्तयोः[2] ॥२२॥

अहं पुनः—

अधरमधु निपीय स्वादुबिम्बाधरायाः
गुरुकुचकलशाया गाढमालिङ्ग्य गात्रम्।
विपुलतरनितम्बामङ्कमानीय रङ्को
निधिमिव विधियोगात्प्राप्य धन्यो भवेयम् ॥२३॥

चित्र —हला किं आकण्णिदं ? (सखि ! किमाकर्णितम् !)

उषा —[सरोमाञ्चं मुखमवनयति]

[नेपथ्ये]

भर्तृदारिके ! देवी प्रियम्बदा आज्ञापयति । यथा दक्षिणेक्षणबाहुस्पन्दनं ममानिष्टमाचष्ट इति[3] तद्भवतीभ्यां सविध एवावस्थेयमिति।

चित्र —[ससम्भ्रमम्] हला सुदं क्खु जं कञ्चुकी कहेदि ?
(सखि ! श्रुतं खलु यत्कञ्चुकी कथयति।

उषा —सहि गमिस्सम्ब। (सखि ! गमिष्यावः।)

अनि —[वज्रपातं मन्यते]।

चित्र —अज्ज क्खणमत्तं एत्थं ज्जेव चिट्ठ। पुणो वि दंसणं भविस्सदित्ति।
(आर्य्य ! क्षणमात्रमत्रैव तिष्ठ। पुनरपि दर्शनं भविष्यति इति[4]।) [उभे निष्क्रान्ते]

अनि —[निःश्वस्य] कथमपक्रान्तवती कान्ता। प्रिये—

आकर्ण्य तत्प्रलयकन्दलिता न वाणी
विश्रब्धवीक्षणसुधापि न पीयते स्म।
शृङ्गारमङ्गलकथातु दवीयसी किं
सन्तापमद्य वितरीतुमवेक्षितासि ॥२४॥

1. (ख) नितम्बबिम्ब।
2. (कग) हारास्तयो।
3. (कग) इव।
4. (ख) इति-उल्लेखो नास्ति।

अथवा—

मोहाविष्टः कत्यहं प्रत्यहं ते
कायव्यूहानैन्द्रजालिक्यपश्यम् ।
साक्षादद्य प्रेक्षितासीति जान-
नात्मैवायं स्यादुपालम्भनीयः ॥२५॥

भवतु, द्रुमवल्लरीविलोकनेनैवात्मानं विनोदयिष्यामि । [इत्युत्थाय त्रिचतुरपदानि गत्वा] वयस्य ! वकुलतरो !

सा मामत्यजदागसामविषयं प्रायः स्वतन्त्राशया
वैमत्यप्रणयावकारणतया कुर्वन्ति वामभ्रुवः ।
यत्तासां चरणाहतिव्यतिकरस्थानानि कङ्केलयो
युष्माभिर्मुखपुण्डरीकमदिरा गण्डूषमापीयते ॥२६॥

[अन्यतो निर्वर्ण्य] सखि ! नवमालिके !

मल्लीवल्लीजलोलागरिमपरिमलं प्राप्य यः संनिधत्ते
घस्रेऽजस्रं नलिन्यां सरसि विहरता येन मध्येन[1]पीतम् ।
तस्मिन्नीदृक्भवत्या मधुलिहि विहितं प्रेम किं नाम कान्ता
मन्तुर्वाङ्मानसाभ्यामपि न परिचितो यस्य तं मामहासीत् ॥२७॥

[परतश्च गत्वा] षट्पदविषकन्यके ! गन्धफलि !

यदि सपदि विधूतो दैवगत्या भवत्या
मधुरमधुरसस्यानास्पदीकृत्य भृङ्गः ।
किमितरलतिकायां केलि[2]रस्याद्य न स्या-
त्कथय किमुषयाहं त्यज्यमानः करिष्ये ॥२८॥

[पुरतश्च] अये प्रत्यागता प्रेयसी । [इत्युपसृत्य[3]]
आं माधवि ! माधवि !

चलकिशलयश्रेणीनाकम्पिताङ्गुलयोऽलयो
न नयनपरिक्षेपाः पुष्पाणि न स्मितकौमुदी ।
स्तवकसुपमानोरोजश्री न वा दयितासि तत्
त्किमिति चपले व्यामोहं मे त्वमद्य वृथाऽकृथाः ॥२९॥

1. (क) मध्येव ।
2. (ख) केरि ।
3. (ख) इत्युत्थाय ।

[अन्यतो गत्वा] किमिदानीमपि नागता प्राणेश्वरी ।

[आकाशे] सखि ! बाणासुरनन्दिनि !

प्रालेयद्युतिवंशभूरिति मनोजन्मात्मजन्मेति वा
मन्ये मह्यमसह्यमानविरहावस्कन्दिताऽसूयसि ।
दैवादिन्दुरपि स्मरोऽपि रिपुतामेवाद्रियेते मयि
त्वद्भक्तोऽयमिति त्वमुज्झसि पुनः कस्याहमस्मि प्रिये ॥३०॥

अपि च—

स्वाधीनस्य जनस्य मन्मथभिया निर्गन्तुमुत्कण्ठया
कण्ठाग्रे निवसन्ति तावदसवः क्रूरे न जानासि किम् ।
द्वित्रानेव वचोलवान्[1] विदधतो कर्तुं मुधा दुर्दिनं
त्वं चेदिच्छसि[2] तत्प्रयाणकरणादेतैर्न वर्तिष्यते ॥३१॥

[ततः प्रविशत्युषा चित्रलेखा च]

उषा —[स्वगतम्] कधं अअं क्खणमत्त विपलम्भादो वि दुम्मणा वेदि ।
(कथमयं क्षणमात्रविप्रलम्भादपि दुर्मनायते ।)

चित्र —हला देक्ख एसो विरहकादरोतधा तुमं अण्णेस्सदि । जधा संमुहे वि अण अम्मे अवलोएदि ।
(सखि ! पश्य एष विरहकातरस्तथा त्वामन्वेषयति यथा सम्मुखेऽपि नावलोकयति ।)

उषा —सहि सव्वाओदु । (सखि ! शङ्कायताम् ।)

चित्र —[उपसृत्य] अज्ज परिअणं कडक्खेण किदथ्वी करेहि ।
(आर्य्य ! परिजनं कटाक्षेण कृतार्थी कुरु ।)

अनि —[श्रुत्वा । ससम्भ्रमम्] कथमुषाचित्रलेखे एव । अहं पुनः मकरकेतुशरप्रसूनपरागैरन्ध इव नावधारयमि ।

चित्रलेखे ! स्वागतं भवत्योः ।

चित्र —विसेसदो तुम्भाणं दंसणेण । (विशेषतो युष्माकं दर्शनेन ।)

अनि —कथमम्बा भवत्यौ परित्यक्तवती ।

---

1. (क) वचोदवान् ।
2. (ख) चेदिरसखि ।

चित्र — साअंतणकुसुमाणं अवचअं अवदिसिअ आगदं ।
(सायन्तनकुसुमानामवचयमपदिश्यागत् ।)

अनि —[सशिरःकम्पम्] अपरिमेयोपायासि[1] !

चित्र —[विमृश्य] अज्ज जाणम्पि पज्जटणेण खिज्जसि त्ति तामालदी मण्डववेदिआं अहिआसिदुं अरहसि ।
(आर्य ! जानामि पर्यटनेन खिन्नस इति । तन्मालतीमण्डपवेदिकामध्यासितुमर्हसि ।)

अनि —युवामप्यत्रागच्छतम् । [सर्वे मालतीमण्डपमधितिष्ठन्ति ।]
नेपथ्ये—

[2]क्रान्मनेमिकठोरकुट्टिमतटीसंघट्टशङ्काभर—
त्रस्तानुरुनिरुद्ध्यमानकविका वक्रीभवत्कन्धराः ।
गच्छन्तश्चरमाचलोपरि चिरं फेनायमाना रवे—
र्लब्धाकण्टकवेणुवेत्रसरणीमुत्पुच्छयन्ते हयाः[3] ॥३२॥

अपि च—

कृत्वाम्भोरुहवल्लरीविलसितं धृत्वा वसूनीहते
शुद्धं दण्डयुतोऽर्यमा किमुपरि व्रज्यावतामग्रणीः ।
यत्क्रोशद्द्विजराजिमेषचरमक्षोणीधराधित्यका—
मायातो भृगुपातमारचयितुं रक्तांशुकः सम्प्रति ॥३३॥

अनि —[ससम्भ्रमम् आकर्ण्य] कथमियमाविर्भूतैव सायन्तनी सन्ध्या । [विहस्य]

आशा एव विपश्चितोऽपि वत ये देवस्य पाथोजिनी
जानेरेकरथाङ्गको रथइति प्रख्यातिमातन्वते ।
अस्मिन्नस्तमहीधरस्य विषमग्रावौघवद्धां तटी—
मारूढे मदनेकचक्रनिकरो विच्छेदमागच्छति ॥३४॥

1. (ख) अपमेयोपायासि ।
2. (क) भ्रामन्नेमि ।
(ङ) न्यञ्चन्नेमि ।
3. (खङ) दूरादेव निरीक्ष कण्टकतरूनुत्पुच्छयन्ते हयाः ।

पुनर्नेपथ्ये—

निखिलदिगवलानां यावदेवान्धकारो
न भवति मृगनाभी पत्रलेखाभिरा :।
अयमुदयमहीध्रे तावदम्भोधिमध्या—
द्विजपतिरवतीर्णः साधुसन्ध्यामुपास्ते ॥३५॥

अपि च—

देवः पञ्चशरोऽवरोहति दिवो यैरेव निःश्रेणिका
श्रेणीभिर्नवनागरी जनमनो लीलानिवासं प्रति।
स्तोकीकृत्य तमो गवाक्षविवरावस्यन्दिनस्ते महः
[1]सन्दोहारजनीकरस्य वड्भीगर्भानुपस्कुर्वते ॥३६॥

अनि —[श्रुत्वा विहस्य] भगवन्! विभावरीपते! परमनुगृहीतोऽस्मि यथावसरमुदित्वरेण भवता। [उषा चित्रलेखे मिथो विलोक्य विहसतः।]

अनि —[चित्रलेखां प्रति] सखि! पश्य पश्य—

प्रस्थायार्कवियोगवैकृतजुषोराजीवनमालिया—
दुन्मीलन्मुखरालिनिक्वणमणीमञ्जीरमञ्जुस्वनम्।
प्रत्यग्रोच्छ्रयमाणकैरवघटातारासमष्ट्योः पदे
विष्टभ्यैव न किं त्रिविक्रमवधूः श्रीरिन्दुमाक्रामति ॥३७॥

[उषां प्रति]

तन्वि त्वद्वदनोपमाधिगतये प्रालेयभानौ पुरा
कस्तूरीमयवर्णकेन नयनद्वन्द्वं लिखित्वा विधिः।
आनीमस्तदपि त्वदीयमुखतोऽन्वग्भावमावश्यकं
मत्वा लिम्पति यत्कलङ्ककपटान्मालिन्यमालोक्यते ॥३८॥

चित्र —[ऊर्ध्वमवलोक्य] कधं अचिरेण कियवीरयणी। (कथमचिरेण। कियती रजनी।)

अनि —[सर्वतो निर्वर्ण्य] यत्सत्यमुपलक्षितम्। सम्प्रति हि—

यातायातानिवातायन विषमपथे योषिदाश्लेषलोभा—
त्कारंकारं पिपासारभसपरवशो मातरिश्वातिमात्रम्।

---

1. (ख) स्यन्दोहा।

लब्ध्वा[1]भिसारनारीवदनपरिमलप्रेमलोलालिजाला[2]
प्रत्यादिष्टावशिष्टान्यपहरति मुहुः कैरवेभ्यो मधूनि ॥३६॥

चित्र —[आकृतमवगत्य] ता सहि णिद्दा सहणं गन्तुं अरहसि। [अनिरुद्धं प्रति च] अज्जो वि अ गमिस्सदि।

(तत्सखि! निद्रासदनं गन्तुमर्हसि। आर्योऽपि गमिष्यति।)

अनि —यदभिरुचितां भवत्यै।

[इति निष्क्रान्ताः सर्वे]

॥ प्रियतमासमागमो नाम सप्तमोऽङ्कः ॥

1. (कग) लब्धा।
2. (कगङ) ०माला।

—अष्टमोऽङ्कः—

[ततः प्रविशति नारदः]

नारदः—[निःश्वस्य] कष्टं भोः कष्टम् ।

प्रसरति रतिवर्त्ता वत्सयोः पन्नगीव—
नगरनरवधूनामास्यनाकूदरेभ्यः ।
प्रतिवसति च वाणः प्रेष्यमाणाह्वयन्ती
भटततिरनिरुद्धं विस्वगन्विष्यतीयम् ॥ १ ॥

[विमृश्य] कथमेतेऽनिरुद्धं लक्षयेयुः । स खलु खेचरसिद्धिवदन्तर्द्धानसिद्धिमपि ज्वालामुखीमयाचत । तयैवात्र च कियन्तं समयमलक्षितोऽयमतिवाहितवान्

[पुनर्विमृश्य]

गोपायितुं पुनरुषा न युवानुवन्ध—
मदमार्हति[1] प्रियसखीवचनस्थितापि ।
यत्नेन तावदधि[2]पेटिपटेऽपि बद्धा
कस्तूरिकापरिमलं न तिरोदधाति ॥ २ ॥

[किञ्चिदपक्रम्य । पुरो दृष्ट्वा]

कथमेषामाह्वानमसहमानश्चित्रलेखानेकवारनिवारितोऽपि भ्रूकुटीपटलभयंकरभालविलसितस्वेदविन्दुरसिफलकपाणिरनिरुद्ध एक एवाभिवर्त्तते । [सहर्षम्] अवधूताश्चैते योद्धारः कुमारपराक्रमेणापक्रमन्ति । [सभयम्] वाणोऽपि निजबलव्यसनविलोकनामर्षदुर्दर्शतनुः स्वयमेवायाति । [विचिन्त्य] कथमिदानीमपि नागच्छति गरुडमारुह्य गोविन्दो बलदेवप्रद्युम्नौ च । कथं वा वयस्य पर्वतो विलम्बते ।

पर्वतः —[प्रविश्य] वयस्य ! उद्विजमान इव लक्ष्यसे ।

नारदः—[विलोक्य । सानन्दम्] कथं वयस्यः ! सखे ! किमस्माकमुद्वेगं पृच्छसि । अपि जानाति भवानुषायामनुरक्तोऽनिरुद्ध इति ।

पर्वतः —हं, ततः किम् ?

---

1. (क) लक्ष्माहिति
(ख) लक्ष्माविति ।
(ग) लस्माहित ।

2 (ख) यत्नेनवधि ।

नारदः—किमन्यत् । अनर्थ एव । पश्य—

स्वावरोधवड़भी गुहातटे
वत्सया विनिह्नितोऽपि धावति ।
बाणयोध[1]निवहेभताण्डवा—
देष केशरि[2]किशोरवत्पुरः ॥३॥

अपि च—

जालान्तः[3] पतयालुविभ्रसदृशा नेत्राम्बुजावेक्षण
क्षीणक्षोणरणादरोऽपि दलयन्नक्षौहिणीर्हेलया ।
सव्यासव्यगतागतक्षणरणच्चमर्ि यदुग्रामणी—
र्मध्येवीथिमरीचिमानिव जवादेकोऽप्यनेकायते ॥ ४ ॥

अपीदानीमेनमभ्युपपद्येरन् यदुप्रवीराः ।

पर्वतः— सखे ! सहैवागमनमस्माकम् । ते तु पारेप्राचीरमग्निमुपशमयितुं प्रवृत्ते गरुत्मति विलम्बन्ते ।

नारदः—दुरवगाहा खल्वितरेषां भगवता वैश्वानरेण बाणराजधानी ।

पर्वतः—यथावगतं वयस्येन ।

नारदः—[पुरोऽवलोक्य । सहर्षम्] वयस्य ! पश्यायमधर ायामायामवतीमालोक्य विस्मेरान्तःकरणैरात्मयोधैरवधापितेनोपरि वीक्ष्यमाणेन चिरेण लक्षितः पृष्ठोदूढवृष्णिवीरत्रयो विहग परिवृढप्राक्पवृक्षच्छेदादिव त्रिकूटशिखरी वियति बंभ्रमतीति ।

पर्वतः—नूनमिदानीमनवसरसम्वर्त्तो भविता

नारदः—तदिमां पिप्पलच्छायामधिष्ठाय समरोत्सवमवलोकयिष्यावः । [इति तथा कुरुत]

पर्वतः—[सानन्दम्] कथमयमनिरुद्धनेदिष्ठो गरुत्मानवतरती ।

नारदः—[सखेदम्]

क्षणवितरणादरो गुरूणां
प्रणमति दण्डवदग्रतोऽनिरुद्धः ।
त्यजति तदिदमन्तरं च मत्वा
बलितनयः शरधोरणीममुष्मिन् ॥ ५ ॥

---

1. (ख) प्राप्तयोध ।
2. (क)
3. (ख) जालान्त ।

[कर्णं दत्त्वा] इदमसहमान किं ब्रवीति पीताम्बरः ।

आस्तां बाणचिरन्तनातिथिरयं प्रागेवसम्भावितः
सम्प्रत्यद्यतनाभ्नागतिथयः सम्भावनीया वयम् ।
त्वामस्मच्चरणारविन्दशरण-प्रह्लाद-पौत्रात्मभू—
रित्यन्तः स्फुरितत्रपा अपि रणक्रुद्धेण याचामहे ॥ ६ ॥

[कम्प धृत्वा] कथमुदारगम्भीरा भारती । [पुनश्च कर्णं दत्त्वा] किं भणति बाणः ?

पितुः प्रागर्थि मामपि समरभिक्षार्थमयसे
यदि त्वां व्रीडा तद्व्यथयति कथंकारमधुना ।
परंतु स्यादेतन्मनसि परितापाय तव य—
न्निजत्राणोपायं कपटवटुरूपं रहयसि ॥ ७ ॥

[विहस्य] कथं बाणोऽपि वक्रवचो वक्तुं जानीते ।

[पुनश्च कर्णं दत्त्वा] चक्रपाणिरपि बाणं श्रावयन्नेवायोग्यसम्वादं परिहृत्य किं वदति बलदेवम् । आर्य्य किं वदति प्रणप्ता हिरण्यकशिपोः ?

त्रायते वटुरित्याह पुत्रद्विड्वंशजः कथम् ।
नैव त्रैवर्ण्यमध्येऽस्ति यद्ब्रह्मण्यमीदृशम् ॥ ८ ॥

अहो वाग्वैदग्ध्यम् ![1]

पर्वत—[पुरो निर्वर्ण्य] सानन्दम् । सखे ! कलिकन्द[2] प्रियात्प्रियमावेदयामि तुभ्यम् ।

तथा हि—

प्रायःस्थापयतीषुपङ्क्तिमभितो दैतेयसेनाग्रणी—
र्वीराणां मुकुटेषु कैटभरिपु ज्यागानयं यादवः ।
बाणेनापि गरुत्मदात्मनि यशो यूपायमानाशुगा—
वल्याशल्लकि[3] भूमिकामभिनवामातन्वता जृम्भितम् ॥ ९ ॥

नारदः—सखे[4] ! विहगपुङ्गवाहति-वीक्षणक्षणविकटभ्रूकुटि-धुमकेतुख्चित-मुखचन्द्रमा वैकुण्ठपरिवृतोऽपि नाराचान् शरासनगोचरी करोति ।

पर्वतः—एतावपि रेवतीपति प्रद्युम्नौ शरधारादुर्दिनमातन्वाते ।

1. (ख ग ङ) [पुनश्च...] इत्यारम्भ अहो वाग्वैदग्ध्यमित्यन्तं नास्ति ।
2. (ङ) कलिकल
3. (क) शल्यकि ।
4. (ख) सखे इत्युल्लेखो नास्ति ।

नारदः—[नखैर्नखान् वादयित्वा] सखे !

चापः कृपाणीभिरिवक्षुरप्रै—
र्यदुप्रवीरेण विभिद्यमानः ।
बाणस्य कौपेयकमाचिकृक्षो[1]—
रयं मयूरध्वजसाम्यमेति ॥ १० ॥

पर्वतः—[ससम्भ्रमम्] कथमसिपाणिर्बाणो रथादवतरन्नभ्युद्धरते । [विचिन्त्य] आरब्धैव राक्षसी माया । यतः

योधास्तज्ज्योतिरुल्कामुकुटमणि घटादीपरोचिः कथा का
यस्मिन्नैवोष्णरश्मिः प्रभवति जगति द्रष्टतमस्तोमरुद्धे ।
एताः प्रेतास्रसिन्धूरभिजिगमिषवः श्रेणयः कौणपीनां
वक्त्रार्चिर्विद्युदुद्दीपित चरणतलामाजिभूमिं भ्रमन्ति ॥ ११ ॥

अपि च—

क्रीडन्ति क्वचिदच्छभल्लकपयो हिन्तालतालायुधा
गर्जन्तो दिगनेकपानपि जगदुद्वेजयन्तः क्वचित् ।
वेताली करतालकैतवतमः स्तम्बेरमानिकिनी
कर्णोद्दीर्णरवश्रवादिव दिवं कण्ठीरवा वृण्वते ॥ १२ ॥

नारदः—कथं रौक्मिणेयोऽपि समये शाम्बरीं मायामारचयति । पश्य—

नीयन्तेऽवतमसभावमन्धकारा
मंक्षूदित्वरमिहिरच्छविच्छटाभिः ।
लीयन्तेऽथ मृगपति प्लवङ्गमर्क्षा
विध्वस्ताः शवरवरूथिनी पटाभिः ॥ १३ ॥

किं च—

परस्परपरिणामकेलिविघट्टित-गण्डमण्डली-मुक्तमौक्तिकायमानकरकनिकुरम्बकाजीमूतदन्तिनोऽमी धारामयमदाम्बुभिरवनीमभिषिञ्चन्ति । अर्णवाश्च कल्पान्त इव वेलामतिवर्तन्ते । गिरयश्च प्राक्पक्षच्छेदा दिवोड्डयन्ते ?

पर्वतः—[सभयम्] सखे ! कियच्चिरमियं प्रायुम्नीकुहकविद्या विद्योतिष्यते ?

नारदः—[विहस्य] मा भैषीः । पश्य जगतामुद्वेगमवगत्य परमकारुणिकस्य चक्रपाणेर्निर्देशेन ।

---

1. (क) चिकर्षो ।
   (ह') चिकर्षो ।

रौक्मिणेये ब्रह्मणीव जगदुत्पत्ति-कारणे।
मायानर्थमयीस्वेयमिदानीमेव लीयते ॥ १४ ॥

पर्वतः—[सविस्मयम्] कथं बाणोऽपि प्रद्युम्नपवनावधूतमायाकादम्बिनीपिधानः प्रकाशते [विमृश्य] कष्टमिदानीमसावसहायः सन्देहमारोहति।

नेपथ्ये—

भो भोः कार्त्तिकेयविनायकप्रभृतयः श्रूयतामेव वो देवः पार्वतिपतिराज्ञापयति। यथा—

नेत्रान्तः पतयालुनीरलवया देव्या प्रसादास्पदो—
भाव प्रागिव शोणपत्तनपताग्रानीयमानावयम्।
गर्भस्थावधि माधवान्वयवधे गुर्वी प्रतिज्ञामथो
कुर्वीम ह्यवधद्ध्वमत्रसमरे यूयं गणाग्रेसराः ॥ १५ ॥

नारदः—[विहस्य] दुष्करमिदं नाम। किमिति प्रतिज्ञायतां भगवता वामदेवेन। नूनमाश्वासनैवेयं बाणस्य।

[विलोक्य। ससम्भ्रमम्] कथमचिरेणैवाजिसमागताः प्रथमाधिकारिणः। अयं च महोक्षमधिष्ठाय देवस्त्र्यम्बकः कण्ठीरवारूढया चण्डिकया चमूनामभिमुखमायाति।

पर्वतः—सखे! पश्य। प्रवृत्तमेव द्वन्द्वयुद्धमम्बिकारुक्मिणीनन्दनयोर्विनायकबलदेवयोश्च।

नारदः—[सवैलक्ष्यम्] सखे!

शरासारैः क्षोणीधर[1] तनुजनुर्नन्दनघना—
वमुक्तं शक्तीस्म्मदमुरसि मग्नं कथमपि।
समारूढो मायामयमथ रथं शम्बररिपोः
क्षुरप्राह्विव्यूहं शिखिमुखमधिष्ठाप्य सहते ॥ १६ ॥

पर्वतः—[सहर्षम्] सखे! देवकीनन्दनोऽपि रौक्मिणेयं परित्रायमाणः कुमारमभियुज्यते।

नारदः—कथमयं शरजन्मनि[2] किशोर इति केशवो मृदुपूर्वं व्यवहरति।

पर्वतः—प्रलम्बारातिरपि लम्बोदरे तथा।

---

1. (ख.ग) क्षोणीरथ।
2. (ख) शरजन्मनि कथमयम्।

नारदः—[निरूप्य। सकौतुकम्] सखे।

हेरम्बस्य निसर्गलोहितरुचो गण्डे च कादम्बरी
सेवाशोणकलेवरस्य हलिनो वक्त्रे च लोला मुहुः।
एषा षट्चरणच्छटान्तरचरी सान्द्रा कुहूशर्वरी
सायं प्रातिकसन्ध्ययोरिव गता मध्यं दरीदृश्यते॥ १७॥

पर्वतः—[ससम्भ्रमम्। नेत्रे निमील्य] धिक् धिक्, गोविन्दबलदेवाभ्यां पुत्रौ परित्रातुकामाया भगवत्या बीभत्सविजृम्भितम्। पश्य—

क्रीडत्यट्टाट्टहास प्रकटितरदनोडुच्छटां दर्शयन्ती
विभ्रंसिप्रांशुकेशान्धतमसमसकृद्दिक्षु संस्पर्शयन्ती।
स्कन्दद्वैमातुरादीक्षणसरसिरुहां व्यूहमामुद्रयन्ती
शत्रूणां कालरात्रिर्द्धरणिधरभुवः कौटवी भूमिकेयम्॥ १८॥

नारदः—[साद्भुतमङ्गुल्या निर्दिश्य] कच्चिदितो विलोकयसि।

लोकानामनुमापयन्ननुपमं दिग्दाहमौत्पातिकं
धूलिधूमकदम्बकव्यतिकरम्लानैश्चिताभस्मभिः।
मुष्टामुष्टि भुजाभुजि ध्वनिभराक्रीडाष्टदिक्कोटर—
स्तैर्नेत्रज्वरवैष्णवीज्वरकलिः कीदृक्पुरो वर्तते॥ १९॥

पर्वतः—[सत्रासम्] कोऽयं पुनरुत्तरेण समरचत्वरं कोलाहलः श्रूयते।

नारदः—[क्षणमवधार्य] सखे! बाणेन सह युध्यतो[1] वैनतेयध्वजस्य धन्वध्वनिरयं पतङ्ग—पतिपक्षास्वसम्बलितः समुल्लसति। पश्य—

पातुं प्राणसमीरणानिव वहिस्तूणीरवल्मीकतो
निर्यद्भिर्विषमार्जिताकृतिमुखैर्जीवापकर्षक्षमैः।
प्राप्यन्ते कमलालयापति—पृषत्काशीविषाणां गणै—
र्दोःश्रेणीकपटाः पटीरतरवो देवद्रुहामीशितुः॥ २०॥

---

1. (क ग) युध्यतो।

अपिच—

स्तम्भाजम्भारिलोकानवरतविजयस्येव देवद्विषोऽमी
बाहूव्यूहाः शराणांततिभिरभिहता देवकीनन्दनेन ।
माहिष्मत्या मघोनः समितिपरशुना रेणुकासूनुनेव
क्ष्मापृष्ठे निर्लुठन्तो भुजगपतिफणश्रेणीमायासयन्ति ॥ २१ ॥

तदिदानीं बाणस्य चत्वार एव बाहवोऽवशिष्यते ।

पर्वतः—[सखेदम्] कथमीदृशं भुजवीर्यं विजृम्भमाण[1] मसहमानेन चक्रपाणिस्त्रिनेत्रेणा—भिगम्यते ।

नारदः—[सकौतुकम्]

सन्धीयन्ते जटायां[2] शिखिगरुदिपवश्चक्रिणा शूलपाणे—
र्मूर्द्धन्यप्यर्द्धचन्द्राकृतिफलविशिखावामदेवेन विष्णोः
इत्याकल्पद्वयव्यत्ययविरचनयान्योऽन्यभावानुबन्धं
स्वीकुर्वाणाविव श्रीपतिगिरितनयानायकौ न त्रपेते ॥ २२ ॥

पर्वतः—[ऊर्द्ध्वं दृष्ट्वा] सखे ! कोऽयम् ?

नारदः—[विलोक्य] एष भगवान् रविनन्दनः समरविच्छेदाय देवयोरन्तरे मरालमवतार—यति ।

पर्वतः—[सहर्षम] दिष्ट्यानेन ज्ञापितात्मानावीशानकेशवौ कलहान्निवर्त्तेते सम्प्रति हि—

सप्रत्यभिज्ञमितरेतरमीक्षमाणौ
राजीवकुट्मलदशाद्रियमाणपाणी ।
एतौ पतङ्गपतिपुङ्गवराजकेतू
व्रीडावनम्रवदनं सपदि स्मयेते ॥ २३ ॥

नारदः—[सविस्मयम] कथमचिरेणैव परस्परपरिष्वक्तावेतावेकां मूर्त्तिमासादयतः । तथा हि—

अर्द्धं द्वैमातुरेण स्वदशनशकलाशङ्कया वीक्ष्यमाणां
चान्द्रीमर्द्धार्द्धलेखां हुतवहनयनार्द्धेन सार्द्धं दधानः ।
ग्रीवाभ्रूवल्लीरोमावली वहुलतमं शीलयन्तीत्तिमानं
विष्णोरर्द्धमविष्णुर्हिमगिरितनयानायकः प्रादुरस्ति ॥ २४ ॥

---

1. (क) विजृम्भण ।
2. (ख) जटानां ।

अपि च—

गौरी पद्मालयाभ्यां प्रथममधिपति प्राप्तिलोभेन पश्चा—
त्पातिव्रत्याबकीर्णाभवनधिषणया वीक्षितावीक्षितेन ।
कालिन्दी देवनद्योर्व्यतिकरमतिमातन्वताविग्रहेण
व्यक्ताद्वैतौ भविष्णुत्रिपुरहरहरी कौतुकं निर्मिमाते ॥ २५ ॥

अपि च—

अर्द्धे मूर्द्धन्यपर्यालुठदमरनदीवीचिभिर्लोहितमर्द्धे
विभ्रद्बर्हावतंसं श्लथसभयफणिग्रन्थि बर्द्धधतेऽद्‌: ।[1]
लोकालोकाद्रिकल्पामवसजलधिज्ज्वालोचितान्तर्द्धमर्द्धे
पश्यामि श्यामलाभां[2] विपदरुचिमथार्द्धे च नासामिहोर्वीम् ॥ २६ ॥

पर्वतः—[अङ्गुल्या निर्दिश्य] सखे ! इतोऽपि नेत्रे अवतारय । अयमितस्ततो विधूयमानाममरचामर-मारुतापनीतक्लमेषु[3] प्रमथेषु विद्याधरवधू विजय[4] गीतिकाश्रवण जनित सुखतानवेषु[5] दानवेषु मुखरितालिमकरन्द-तुन्दिल-प्रसूनवर्षिषु गृहीतावशिष्टभुजचतुष्टयाभ्यां पार्वतीप्रजापतिभ्यां प्रसभमाकृष्यमाणो बाणः कथंचिद्देवौ प्रणमति । इतश्च—

आश्लिष्टावेव विश्वस्थितिविलयकरावीशितारौ सुराणां
सेनान्यौ रौक्मिणेयावपि किमपि वचः सामपूर्वं ब्रुवाते ।
संग्रामातिक्रमागः क्षमयति हलिनं प्राञ्जलिर्विघ्नराजो
नामोरुक्षाः कटाक्षाः फणिपति-विनतापत्ययोः स्वस्त्ययन्ते[6] ॥ २७ ॥

नारदः—सखे ! एते हि वाणविद्वेषिणस्त्रिदशा देवकीसूनुविजयमाघोषयन्ति वस्तुतस्तु—

---

1. (खगह) रोमालिकैतवाया गुणनिविडतम स्यूतभावादिवैत—
न्यध्ये निर्व्यूढशास्त्रद्रिमभगवतो भाति वर्ष्मार्द्धमर्द्धम् ॥ इति पाठः
2. (क) शामलाभां ।
3. (क) बलमथेषु ।
4. (ख) विजय—शब्दो नास्ति ।
5. (ख) जनिमत नवेषु ।
6. (क) स्वस्त्ययन्ते ।

श्वेतश्यामप्रभासन्ततिकपटनटच्चन्द्रपादान्धकार-
स्फूर्त्या मूर्त्यैकमत्ये तुहिनगिरिसरिन्नायकापत्यपत्योः।[1]
भूयो भूयोऽवदातासितवजनपरिग्यागनग्नं भविष्णु—
व्रीडामग्ना जयश्रीः क्वचन खलु मतिं नाभिसर्तुं बिभर्त्ति ॥२८॥

पर्वतः— कथं सेनानीगजाननादयः प्रथमान्परावर्तयन्तोऽपसर्पन्ति हंसवाहनोऽपि समरमात्मपदमुज्झिहिते। भगवती चोषा मानिनी पुरवरोधाभिमुखी भवति

नारदः—[निर्वर्ण्य। ससम्भ्रमम्] कथमिदानीं पृथग्भूय शिवकेशवौ बलदेवप्रद्युम्नानिरुद्धा बाणश्चामुमेव[2] पिप्पलच्छायामभ्यागच्छन्ति।

[ततः प्रविशन्ति यथा निर्दिष्टाः]

माधवः—सखे! चन्द्रचूड!
नैतादृक् व्यथयन्ति मामभित्रपुर्बाणव्रणश्रेणयो
यादृक् त्वच्चरणारविन्दयुगले संग्रामजा मन्तवः।
तानद्य क्षमयामि धारय मतिं सौहार्दसन्धीच्छया[4]
मैत्रीवीचिभिदेक्षिमा[5] हि कुधियामेव स्वयं शीर्य्यति ॥ २६ ॥

शिवः—[विहस्य] किमिदमुपन्यस्तम्।
शस्त्राणामितरेतरान्य समकक्षाभावदैयर्थ्यजा
कीर्त्तिर्ध्वंसधियेव यद्युपगता वा वामभूवाहवे।
आगस्तत्र किमावयोर्युधि यतः शत्रौ न मित्रे न वा
प्रेमप्रेम किमप्यवारितमतिर्वीरव्रती वीक्षते ॥३०॥

नारदः—सखे! पर्वत. समयस्तावदयं प्रकाशयितुमात्मानम् [इत्युभावुपसृत्य]

उभौ:—विजयेतां भगवन्तौ।

शिव:—कथमत्रैव भवन्तौ।

माधवः—[स्मित्वा] भगवन् कलिकण्डूलविलोकिताः समरकेलयः किमिदानीमपरमीक्षितुमिच्छसि?

---

1. (ख) ०मत्योः।
2. (क) श्चामूमेव।
3. (ख) तथा।
4. (क) संधिरसया।
5. (ख) मैत्रीवातभिदेक्षिमा।

नारदः—किमन्यत् ? अनिरुद्धाय वत्साया भवतोः सन्निधौ समर्पणम् ।

माधवः—अहो ! महीयाननुग्रहोऽनिरुद्धे ।

द्वाभ्यामात्मकलङ्कयोग निगदव्याख्यात चेतो व्यथा—
मह्यावध्यवधीरयन्विजयतां लोके त्रियामापतिः ।
देवस्यास्य शिरोऽवतंसकतयास्मिन्नस्मदीये शिशौ
गोत्रापत्य जनुष्यनुक्षणमृधे युष्मत्प्रसादेन च ॥ ३१ ॥

बलदेवप्रद्युम्नौ—[स्वगतम्] अहोऽत्युक्तिवैदग्ध्यमवसरे ।

शिवः—ऋषे ! प्रागिदमेवाभिप्रेत्य कार्त्तिकेयजनयित्री वत्सामानेतुमगात् ।

[ततः प्रविशति पार्वती स्वावलम्बितपाणिरुषा च]

पार्वती—वत्से ! गुरूनेतानभिवादयस्व ।

उषा :—[अभिवादयते] [सर्वे ऽनिरुद्धवर्जं यथावदाशिषं प्रयुञ्जन्ते]

अनिः—[उषां विलोक्य स्वगतम्]

कौमारव्ययबहुलत्रपादशायां
नेदिष्ठा गुरुविततेरलम्बिगोष्ठी ।
क्वेदानीं पतसि[1] कथं प्रिये ध्रियेथाः
प्रेमायं मयि परमापदे तवासीत् ॥ ३२ ॥

माधवः—[स्वगतम्] स्थाने खल्वस्यामनुरागो वत्सस्य ।

पार्वती—[बाणं प्रति] वत्स !

परिन्यासः कन्या किमिति कमलानायकतनु—
जनुः पुत्रे पुत्रीमिह रमयितुं न स्पृहयसि ।
अथो वैरं निर्यातयितुमिदमिच्छुस्तदफलं
विजीयेरन्न त्वो भुजगविषवैद्या न यदवः ॥ ३३ ॥

तत्स्वयमेव वत्सामनिरुद्धे समर्पय ।

शिवः—वत्स ! गृहाण हितमसावुपदिशति ।

(क) तपसि ।

बाणः— भगवन् ।

युष्मभ्यं यदि रोचते कथमिदं बाणाय न रोचता—
मेते किं भगवत्प्रिया हि यदवो विद्वेषपात्राणि मे ।
शाम्यत्याजिमृजा मनोरथ पयोराशिः प्रियंभावुका
दोः कण्डूमयकूलमुद्रुजनदी तेनाद्य दूयेय किम् ॥३४॥

वज्रः— [जनान्तकम] वत्स ! प्रद्युम्न ! कच्चिदाकर्णयसि । अयमीदृगवस्थोऽपि निर्वाण दग्धेन्धनवन्नोष्माणं त्यजति ।

पार्वती—वत्सानिरुद्ध ! तुभ्यमुपा बाणेन प्रतिपाद्यन [इत्युषाहस्तमनिरुद्धहस्तेन बाणहस्तेन दापयति ।]

नारदः—[सहर्षम्] अये प्रियमिदानीं संवृत्तम् ।

शिव :—वत्स ! बाण !

केकेशरज्जलधरच्छिद्रुरा न भोगा
भुक्ताः किमद्य न विरज्यसि लज्जसे वा ।
षाण्मातुरप्रभृतिभिः प्रमथाधिपत्य—
मागत्य शर्म किमपि त्वमथो लभेथाः ॥ ३५ ॥

तदिदानीमस्माभिः सहैवास्मदाज्ञया प्राग्वीरभद्रेण परिष्कृतं कैलासमङ्गीकृतं महाकालनामधेयोऽधिवसेः ।

बाण :—यद्भगवानाज्ञापयति ।

पार्वती—वत्सानिरुद्ध ! ज्वालामुखीमूर्त्या प्रागनुगृहीतवत्यस्मि । किमद्य भूयोऽपि कामयसे ।

अनि :—[अञ्जलिं बद्ध्वा] भगवति ! निष्पन्ना मनोरथास्तथापीदमस्तु ।

आरभ्यैरावणेभव्रणित गिरिनदीरोध आधावदम्भो
धाराजम्भालजिह्मर्यरूपथमचलं यावदस्ताद्रिपादम् ।
पृथ्वीशाः पालयन्तः स्वभरवतरण प्रीयमाणां धरित्री—
मर्थीप्रत्यर्थीसार्थानधिगतविमुखीभावमाविर्भवन्तु ॥ ३६ ॥

अपि च—

यावत्कैरवरोहिणीरमणयोर्यावच्च पङ्केरुह
छायानायकयोरुदञ्चति मिथः प्रेमानुबन्धप्रथा ।
यावत्स्थावरजङ्गमात्मकतया द्वैतं च लोकत्रये
तावद्भाववतीर्वधूरिवकवेर्वाचो जनः श्लाघताम् ॥ ३७ ॥

पार्वती :—तदेवमेवास्तु ।

[इति निष्क्रान्ताः सर्वे]

॥ अनिरुद्धानन्दो नामाष्टमोऽङ्कः ॥

इति श्री दीक्षित-कविकोविदावतंस-चयनि-चन्द्रशेखर-
रायगुरुविरचितं मधुरानिरुद्धं[1] नाम नाटकं
समाप्तम्

॥ श्री शुभमस्तु । श्रीकृष्णार्पणमस्तु ॥

---

1. (क) विरचितमधुरानिरुद्धं ।

परिशिष्टम्

(पञ्चमाङ्कस्य २५-२६ श्लोकान्तर्गत—प्रस्तावित—पाठः)

जयं वै कृतेन्द्रादिवादित्रभङ्गी
रवारम्भसङ्गो भवद्वैरिवक्षः ।
कवन्धच्छटागर्भसम्वन्ध सङ्गो
लसन्नास्य खट्वाङ्गपाणिप्रणुन्नाम् ॥ १ ॥
द्विपत्वग्वितानोदिताम्भोदशङ्का
नटत्तारकारातिकेलिप्रवेकाम् ।
अतिस्फारवक्त्रावटद्वारजीव—
प्रविष्टा शरश्रेणीसंबाधकालीम् ॥ २ ॥
पिचिण्डप्रचण्डोच्चरद्भूरिभीमा—
नवच्छिन्नहुंकारवित्रास्यमानाम् ।
द्रवद्देवतावस्तुविभ्रंशवीद्यां
हसत्प्रेतवेतालकन्याकदम्बाम् ॥ ३ ॥
भरं स्वपदन्यासभाराभिभूता—
ष्टदिग्दन्तसंत्रासनिर्घोषरोषाम् ।
स्फुरत्केशरिस्थूललाङ्गूललेखा—
परावर्तमानाश्वमार्त्तण्डयानाम् ॥ ४ ॥
स्फुटाचत्तवद्वासरव्यासलाभ-
प्रहृष्यत्तमव्योमगङ्गारथाङ्गीम् ।
भवानीं हि वन्दे सदा देवमोद—
प्रदां वै समित्ताण्डवाडम्बरां ताम् ॥ ५ ॥

श्लोकानामनुक्रमणिका

—छन्दसामनुक्रमणिका—

शुद्धिपत्रम्

पत्रसंख्या	श्लोकसंख्या	अशुद्धम्	शुद्धम्
३	७	यानन्तोऽपि	जानन्तोऽपि
	पादटीका-१	मधिष्ठापका	मधिष्ठायका
४	८	वरहि	विरहि
७	१६	मुत्ककण्ठमाना	मुत्कण्ठमाना
८	१६	भूमो	भूयो
		सौविदल्लाविव	सौविदल्लाविव
	पादटीका	सौविदल्लाविव	सौविदल्लाविव
६	२२	स्वध्याया	स्वाध्याया
१८		उसा	उषा
१६	१५	शस्तागमे	शस्त्रागमे
		उसा	उषा
	६	वीरकाहाला	वीरकाहला
२१	१२	शश्वन्निः श्वसितोष्म	शश्वन्निः श्वसितोष्म
२४	१३	अनधिगतचटु	अनधिगतचाटु
२८	२३	वेधितानिववचामीव	वेधितानि वचांसीव
	२७	प्रत्यक्ष	प्रत्यक्ष
३०	२६	रमणयोरप्रे	रमणयोरग्रे
३५	११	निर्व्यूद्रढ़िमा	निर्व्यूढद्रढिमा
३६	१६	भङ्गवद्वत	भङ्गवद्व्रत
४५	१०	यत्रमा	यत्र मश्वा
४७	१६	व्यत्किकतया	व्यक्तिकतया.
	१७	भीमसोमां	भीमसीमा
	१६	बह्वावह्निविह ता	बह्वावह्निबिनिह ता
४८	३या पंक्तिः	विटपिविघटटनादिव	विटपिविघट्टनादिव
४६	२४	भौरवो	भीरवो
		विशङ्कमेवते	विशङ्कमेव ते
७३	१७	विभरांभूव	विभरांबभूव
७४	१८	तादिदं	तदिदं

५७	६	विलश्नाति	क्लिश्नाति
		विपदेहि	विपदेति
५६	१०	निकूरम्ब	निकुरम्ब
	११	क्रन्दत्क्रङ्कादवन्दी	क्रन्दत्क्रव्यादवन्दी
६०	१५	फणिवधूरत्थ	फणिवधूरन्ध
		तरजदयो	तरजरदयो
६१	१६	स्फुरुद्धमनि	स्फुरद्धमनि
	१७	दूर्षत्तावष्य···वस्तु	दूर्षत्तावप्य···वस्तु
	१८	रसिमवंमयशो	रश्मिमयमयशो
		अयमवन्तो	अयमभन्तो
	पादटीका-४	वुनीसन्मण्डक्षप्रिछक्ष	वुन्मीलन्मण्डलाम्र
		मिक्षदशी	छक्षमिलदयशो
	१६	भूभृन्मत	भूभृन्मत्त
		वीर य	वीरं यं
६२	२०	वीपाणम्	वीरपाणं
	२१	हयश्वता	हयच्छटा
		वरविस्त्रत:	वरविस्रस्त
	२२	कलि	किल
	२३	मनरा	मन्दारा
		धावा···नो	दयावा···नं
६३	२४	ईम्मा।द···तब्धुस्पितं	ईम्भाद·· लब्धेप्सितं
	२५	मालकय	मालोक्य
		अम्मधावधि	अम्भोधावधि
		रा।घुर्णितो	राघूर्णितो
	२६	तानिक्षसे	तानीक्षसे
६७	३७	मुकुटरन्तं	मुकुटरत्नं
७१	११	पुरुरवस	पुरूरवस
७६	१५	पत्रलेखभिरा:	पत्रलेखाभिराम:
८१	१	विस्वग	विश्वग
८३	७	तदव्यथययती	तद्व्यथयति
	८	वशज:	वंशज: